श्री:
भा॰ष॰
टी॰
१

ॐ गणानन नमः ॐ उग्राप्यायते नृसिंहैकनामसिंहो विराजते यत्रारतः पलायंते महाकल्मषकुंजराः १ विस
र्गसंभवान् जीवान् स्वमर्यादासु संस्थितान् विष्णुः पात्यखिलेशैरित्येवं पंचमे स्थितं २ अध्यायैकोनविंशत्या षष्ठे पोषा
णमुच्यते अतिलंघितमर्यादभक्तरक्षणलक्षणं ३ अजामिलो मनुष्येषु महापापोपि यथादितः विष्णुदूपादियालीवतथा
देवेषु वासवः ४ अजामिलस्य भक्तत्वं महापापो यथादितः विष्णुरूपादियानीचतथा देवेषु वासवः विष्णुदूतैर्निरूपितं
मकेत भगवन्नामसुवस्तिहानुषंगजं ५ इंद्रोपि भगवद्भक्तः सत्वेनोपेंद्रसेवकः तदर्थीन स्वरैश्वर्यशत्रुतिजंयजीवितः ६
तत्रादौ त्रिभिरध्यायैरजामिलकथोच्यते विश्वरूपकथा षड्भिः रिंद्रदोषाक्षयेनतः ७ इंद्रस्य वृत्रदोषात्मोहताख्यानं ततोऽष्ट
भिः द्वाभ्यां च मरुदाख्यानमेवं प्रकरणक्रमः ८ तत्रादौ प्रथमे विष्णोर्हूतैः पापविमोचने
तत्त्वापव्यापनायोक्तं सामर्थ्यं मोदिलक्षणं ९ अथ षष्ठस्कंधो व्याख्यायते सर्वो

राजोवाच निवृत्तिमार्गः कथित आदौ भगवता यथा। क्रमयोगोप
लब्धेन ब्रह्मणा यदसंसृतिः १ प्रवृत्तिलक्षणश्चैव त्रैगुण्यविषयो
मुने योसावलीनप्रकृतेर्गुणसर्गः पुनःपुनः २ अधर्मलक्षणा।
नानानरकाश्चानुवर्णिताः मन्वंतरश्च व्याख्यात आद्यः स्वायंभुवोय
तः ३ प्रियव्रतोत्तानपदोर्वंशस्तच्चरितानि च द्वीपवर्षसमुद्राद्रिन
द्युद्यानवनस्पतीन् ४

कानुवादप्रवर्तकं निरंतरोक्त नरकपरिहारोपायं पृष्टवानिति निवृत्तिमार्ग इति षड्भिः
आद्ये द्वितीयस्कंधे एवं स्थाने रयानोत्यादिना भगवता तथा पथ्याप्याथावत् यत् येन मार्गेण क्रमेण योगो विंवादिप्राप्तिः तेनोप।
लब्धेन ब्रह्मणा नेन यदसंसृतिर्मोक्षो भवति ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे परस्यांते कृतात्मानः प्रविशंति परं पदमिति
वचनात् १ त्रैगुण्यसमादिरूपत्वेन देवविषयः शाप्यं यस्य न लीना प्रकृतिर्यस्य तस्य पुंसः पुनः पुनः गुणसर्गः भोगार्थदेहा
देभङ्गरो मार्गः स च कथितः तृतीये दक्षिणेन पथार्यमणः पितृलोकं व्रजंति ते इत्यादिना २ द्वीपादीनुभागतो लक्षण
तो मानं अनुवर्णिताः निरंतराध्यायाख्यात् व्याख्याताः चतुर्थस्मादौ यतः यस्मिन् ३ द्वीपादीनुभागतो लक्षणतो मानतश्च
यथा मेरुतलस्य संस्थानं ज्योतिर्भाविवरणोपदं संस्थानं विभुर्यथास्तं तथा व्याख्यातमित्यर्थः ४ ॥

१

नानोग्रयातनायेषुतान्नरकान्यथायेनोपायेनवव्रजेत्नगच्छेत्तन्मेअधुनाव्याख्यातुमर्हसि ६ तत्रतावन्मत्वागुरुं
प्रायश्चित्तंविनानरकाद्दुर्निवाराइत्याह नचेदितिद्वाभ्यांमनउक्तिपाणिभिर्मनोवाक्कायैःकृतस्यांहसःतैरेवइहैवापचि-
तिंप्रायश्चित्तंनकुर्याच्चेत्तर्हिसपुरुषःप्रेत्यमृत्वानरकान्ध्रुवमुपैतिमेमयायेभवतःकीर्तितास्तिग्मादारुणायातनायेषु
तान् ७ यस्मादेवंतस्मात्पापस्यप्रायश्चित्तेयतेतकदामृत्योःपुरैवतत्रापिअविपद्यताअक्लिश्यमाणेनात्मनादेहेनयद्वा
अविपदात्विपत्तिरहितोयावत्तेनात्मनासयतेतमनसातत्रापिआशुअन्यथाप्रतीवचिरकालेनतद्विशाणोवतमर्हतीतिदे

धरामंडलसंस्थानंभागलक्षणमानतः ज्योतिषांविवरणंचयथेदमसृजद्विभुः ५ अधुनेहमहाभा-
गयथैवनरकान्नरः नानोग्रयातनान्नेयात्तन्मेव्याख्यातुमर्हसि ६ शुकउवाच नचेदिहैवापचितिंयथां-
हसः कृतस्यकुर्यान्मनउक्तिपाणिभिः ध्रुवंसवैप्रेत्यनरकानुपैतियेकीर्तितामेभवतस्तिग्मयातनाः ७
तस्मात्पुरैवाश्विहपापनिष्कृतौयतेतमृत्योरविपद्यतात्मना दोषस्यदृष्ट्वागुरुलाघवंयथाभिषक्चिकि-
त्सेतरुजांनिदानवित् ८ राजोवाच दृष्टश्रुताभ्यांयत्पापंजानन्नप्यात्मनोहितं करोतिभूयोविवशःप्रा-
यश्चित्तमथोकथं ९ क्वचिन्निवर्ततेभद्रात्क्वचिच्चरतितत्पुनः प्रायश्चित्तमथोपार्थंमन्येकुंजरशौचवत्
१० बादरायणिरुवाच कर्मणाकर्मनिर्हारोनह्यात्यंतिकइष्यते अविद्वदधिकारित्वात्प्रायश्चित्तंविमर्श-
नम् ११ ॥

गुरुत्वापत्तेःतत्रचपापस्यमहत्त्वेअल्पत्वेवावेद्यतदनुरूपेप्रायश्चित्तेयतेतरुजांरोगाणांनिदानविद्यथावैद्यःतदनुरूपं
चिकित्सेततद्वत् ८ अत्रचोदयतिद्वाभ्यां दृष्टंराजदण्डादिश्रुतंनरकपातादिताभ्यामात्मनःपापमहितंजानन्नपिभूयः
प्रायश्चित्तानन्तरंकरोतिअथोअतःकात्रुणालद्वादशाब्दादिकंप्रायश्चित्तंतेनसमूलस्यदोषस्यापिनिवृत्तिःनिवृत्तौवापु-
नःपापप्रवृत्तिर्नस्यादितिभावः ९ किंचक्वचित्कदाचिदभद्रात्पापात्निवर्ततेक्वचित्तदेवपुनराचरति यथाकुंजरः
स्नातोपिरजोभिरात्मानंमलिनीकरोतितथापापस्यपुनरुद्देनिवारत्वेनरकपातस्यावश्यंभावित्वात्प्रायश्चित्तंव्यर्थमिति
१० परिहरतिकर्मणाकृच्छ्रादिप्रायश्चित्तेनकर्मणःपापस्यनिर्हारोनाशःआत्यंतिकःसमूलोनह्यिष्यतेअविद्वानधि-
कारीयस्मिंस्तत्स्वभावःतस्मात्अज्ञोविद्यायातनाशाभावात्नहिपितस्मिन्पापजन्यसंस्कारेणपापान्तरस्यजननःपुनःप्रवृ-
त्तिर्भवत्येवअतःतत्त्वज्ञस्यप्रायश्चित्तंतदाह प्रायश्चित्तंतुविमर्शनंज्ञानम् ११

श्रीः
भा·ष·
टी·
२

ननुनित्यमप्रमत्तः शनैर्लभेतेनान्य इति सदृष्टांतमाह नेति पथ्यमेवान्नमश्नतः पुरुषान्व्याधयोयथानबाधंतेतथा नियमादिकृत्क्षेमायनवर्तनोनायसमर्थोभवति ११ एतदेवविशदयतिद्वाभ्यां तपसा एकाग्र्येण मनसइंद्रियाणांचऐ काग्र्यंपरमंतपइतिस्मृतेः ब्रह्मचर्येणाष्टांगेन तदुक्तं स्मरणंकीर्तनंकेलिःप्रेक्षणंगुह्यभाषणं संकल्पोध्यवसायश्च क्रियानिर्वृत्तिरेवच एतन्मैथुनमष्टांगंप्रवदंतिमनीषिणः विपरीतंब्रह्मचर्यमेतदेवाष्टलक्षणमिति शमोमनसो नियमनंदमोबाह्येंद्रियाणांत्यागोदानंयमोहिंसादिर्नियमोजपादिः १३ १४ अस्यातिदुष्करत्वान्मुख्यमेवान्यत्प्राय श्चित्तमाह केचिदित्यनेनैवंभूताभक्तिर्यथानाविरलाइतिदर्शयति केवलयातपआदिनिरपेक्षयावासुदेवपरायणाइति

नाश्नतः पथ्यमेवान्नंव्याधयोभिभवंतिहि एवंनियमकृद्राजन्शनैःक्षेमायकल्पते ११ तपसाब्रह्मचर्येण शमेनचदमेनच त्यागेनसत्यशौचाभ्यांयमेननियमेनच १२ देहवाग्बुद्धिजंधीराधर्मज्ञाःश्रद्धयान्विताः क्षिपंत्यघंमहदपिवेणुगुल्ममिवानलः १३ केचित्केवलयाभक्त्यावासुदेवपरायणाः अघंधुन्वंतिका र्त्स्न्येननीहारमिवभास्करः १४ नतथाह्यघवान्राजन्पूयेततपआदिभिः यथाकृष्णार्पितप्राणस्तत्पुरु षनिषेवया १५ सध्रीचीनोह्ययंलोकेपंथाःक्षेमोकुतोभयः सुशीलाःसाधवोयत्रनारायणपरायणाः १६ प्रायश्चित्तानिचीर्णानिनारायणपराङ्मुखं ननिष्पुनंतिराजेंद्रसुराकुंभमिवापगाः १७ सकृन्मनःकृ ष्णपदारविंदयोर्निवेशितंतद्गुणरागियैरिह नतेयमंपाशभृतश्चतद्भटान्स्वप्नेपिपश्यंतिहिचीर्णनिष्कृ ताः १८ अत्रचोदाहरंतीममितिहासंपुरातनं दूतानांविष्णुयमयोःसंवादस्तंनिबोधमे २०

नाधिकारिविशेषणमेतत् किंत्वस्यामश्रद्धयानशमहेतोर्यानुष्ठवपर्यवसानादनुवादमात्रं १५ एतदेवज्ञानसाधनाद्वि शिष्टमित्याह नतथेति येनप्रकारेणतत्पुरुषनिषेवयाकृष्णार्पिताःप्राणायेन १६ तत्रहेतुः सध्रीचीनः समीचीनः अ यंपंथाः भक्तिमार्गः यतः क्षेमः क्षेमहेतुः नकुतश्चित्विघ्नादेर्भयंयस्मिन् तदेवाह सुशीलाः कृपालवः साधवोनिष्का माः यत्रधर्मनिष्ठाः एतेज्ञानमार्गेइवासहायतानिमित्तंभयंनापिकर्ममार्गवन्मत्सरादिप्रयुक्तंभयमितिभावः १७ भक्तिर हितानिपुनस्तत्कृच्छ्रादीनितत्रनशोधयंतीत्याह प्रायश्चित्तानीति महतामप्यशोधकत्वेदृष्टांतमाह सुराकुंभमापगा इवेति १८ भक्तिःस्वल्पापिपुनात्येवेत्याह तद्गुणरागिभक्तं चेतसैवतच्चेन्नतत्रस्थितंयस्यतन्मनः तावतैवचीर्णनिष्कृतंप्राय श्चित्तंयैः १९ यममर्थमितिहासेनोपपादयति अत्रचेतिममतः २०

कान्यकुब्जे पुरे दास्याः पतिर्नाम्ना अजामिलः २१ बन्दीग्रहेणाक्षैर्द्यूतेन कैतवैर्वञ्चनादिभिश्चौर्यैर्विकोद्धत्तिं बिभ्रत्पुष्णन्
नृपान् यातयामास पीडयामास २२ अशुचः संबन्धी महान् कालो ऽत्यगात् स कियानित्यपेक्षायामाह अष्टाशीत्या संख्यया युक्ताः
समाः संवत्सराः २३ प्रवयसः प्रवृद्धस्य २४ बद्धहृदयः येन मनः बद्धो हृद्यः २५ यत्तत्तदुपलालनादि श्रीनारायणनाम्नो
पचारमाहात्म्येन तद्भक्तिरेवाभूदिति सिद्धान्तोपयोगित्वेनापि द्रष्टव्यं २७ वक्राणि तुण्डानि मुखानि येषां ऊर्ध्वानि रोमाणि ये

कान्यकुब्जे द्विजः कश्चिद्दासीपतिरजामिलः नाम्ना नष्टसदाचारो दास्याः संसर्गदूषितः २१ बन्द्यक्षकैतवै
श्चौर्यैर्गर्हितां वृत्तिमास्थितः बिभ्रत्कुटुम्बमशुचिर्यातयामास देहिनः २२ एवं निवसतस्तस्य लालया
नस्य तत्सुतान् कालो ऽत्यगान्महान् राजन्नष्टाशीत्यायुषः समाः २३ तस्य प्रवयसः पुत्रा दश तेषां तु यो ऽवमः
बालो नारायणो नाम्ना पित्रोश्च दयितो भृशं २४ स बद्धहृदयस्तस्मिन्नर्भके कलभाषिणि निरीक्षमाणस्त
ल्लीलां मुमुदे जरठो भृशं २५ भुञ्जानः प्रपिबन् खादन् बालकस्नेहयन्त्रितः भोजयन्पाययन्मूढो न वेदाग
तमन्तकं २६ स एवं वर्तमानो ऽज्ञो मृत्युकाल उपस्थिते मतिं चकार तनये बाले नारायणाह्वये २७ स पाश
हस्तांस्त्रीन्दृष्ट्वा पुरुषान् भृशदारुणान् वक्रतुण्डानूर्ध्वरोम्ण आत्मानं नेतुमागतान् २८ दूरे क्रीडनकास
क्तं पुत्रं नारायणाह्वयं प्लावितेन स्वरेणोच्चैराजुहावाकुलेन्द्रियः २९ निशम्य म्रियमाणस्य मुखतो हरिकी
र्तनं भर्तुर्नाम महाराज पार्षदाः सहसापतन् ३० विकर्षतो ऽन्तर्हृदयाद्दासीपतिमजामिलं यमप्रेष्यान्विष्णु
दूता वारयामासुरोजसा ३१ ऊचुर्निषेधितास्तांस्ते वैवस्वतपुरःसराः के यूयं प्रतिषेद्धारो धर्मराजस्य शासनं
३२ कस्य वा कुत आयाताः कस्मादस्य निषेधथ किं देवा उपदेवा वा यूयं किं सिद्धसत्तमाः ३३ सर्वे पद्मपलाशा
क्षाः पीतकौशेयवाससः किरीटिनः कुण्डलिनो लसत्पुष्करमालिनः ३४ सर्वे च नूत्नवयसः सर्वे चारु

घोनान् २८ प्लावितेन प्लुतस्वरेणोच्चैः नीतेन २९ हरिकीर्तनं निशम्यापतन् यतस्तद्भर्तुर्नाम ३० पुरःसराः भृत्याः ३२ अ
स्यनयनं निषेधथ ३३ वयं युष्मान्न जानीमः इति न कोपः कार्यः यतो लौकिकाद्भुतरूपा यूयमित्याह सप्तभिः सार्द्धै
र्ध्यो लसन्तः पुष्करमालाः सन्ति येषां ३४ नूत्नं नवं वयो येषां निषङ्गः तूणीरः धनुर्निषङ्गादिभिः श्रीः शोभा येषां ते वित
तेन तिमिरेण आलोकाः स्वान्यप्रकाशो यासां तथाभूता दिशः कुर्वन्तः ३५

६

श्रीः
भा॰ष॰
टी॰
३

भवनामेतदनुचितमित्याहुः किमर्थमिति ३६ अहो देवादेवादिरिताननात्यापते चोरापद्रवास्माद्भियाद्धर्मराजस्य किंकरा
इत्यनूनं वदेतीतिवि स्मयेन प्रहस्य तान्प्रत्यूचुः मेघस्येव निर्ह्रादो ध्वनिर्यस्याः तया ३७ तत्त्वं स्वरूपं लक्षणं प्रमाणं ३८
कथं स्विद्केन च प्रकारेण स्थानं विषयः कारिणः कर्मिणः नृणामिति तत्र एव तत्पश्चात्स्थः तेषु कतिचिदेवेत्यर्थः ३९
वेदेन प्रणिहितो विहितो धर्मः वेदप्रमाणक इत्यर्थः अनेन वेदप्रमाणको यो धर्मः स धर्मः वेदप्रमाणक इति स्वरूपं प्रमा
णं चोक्तं यथाह जैमिनिः चोदनालक्षणोऽर्थो धर्म इति व्याख्यातं च भट्टैः द्वयमेकेन सर्वेण सूत्रेणार्थाभ्यां निरूप्यत इति अप्रव
त्तस्यापि धर्मस्य स्वरूपं लक्षणं वदंत स्थानं कथयन्त्याहुः तद्विपर्ययः यो वेदनिषिद्धः सोऽधर्मः निषेधश्रुतिस्मृतिप्रमाणमि

दिशो वितिमिरालोकाः कुर्वंतः स्वेन रोचिषा किमर्थं धर्मपालस्य किंकरान्नो निषेधथ ३६ श्रुक उवाच इत्यु
क्ते यमदूतैस्ते वासुदेवोक्तकारिणः तान्प्रत्यूचुः प्रहस्येदं मेघनिर्ह्रादया गिरा ३७ विष्णुदूता ऊचुः यूयं वै
धर्मराजस्य यदि निर्देशकारिणः ब्रूत धर्मस्य नस्तत्त्वं यच्च धर्मस्य लक्षणं ३८ कथंस्विद्ध्रियते दंडः किं वास्य
स्थानमीप्सितं दंड्याः किं कारिणः सर्वे आहोस्वित्कतिचिन्नृणां ३९ यमदूता ऊचुः वेदप्रणिहितो धर्मो श्री
ह्यधर्मस्तद्विपर्ययः वेदो नारायणः साक्षात्स्वयंभूरिति शुश्रुम ४० येन स्वधाम्न्यमी भावा रजःसत्त्वतमो
मयाः गुणनामक्रियारूपैर्विभाव्यंते यथातथं ४१ सूर्योऽग्निः खं मरुद्गावः सोमः संध्याहनी दिशः कं कुः १८
स्वयं धर्म इति ह्येते दैह्यस्य साक्षिणः ४२ एतैरधर्मो विज्ञातः स्थानं दंडस्य युज्यते सर्वे कर्मानुरोधेन दंडम
र्हंति कारिणः ४३ संभवंति हि भद्राणि विपरीतानि चानघाः कारिणां गुणसंगोऽस्ति देहवान्नह्यकर्मकृत्

त्यर्थः वेदस्य प्रमाणत्वे हेतुः वेदो नारायण इत्युक्तं तु स एव साक्षादिति उपचारः स्वयंभूरिति यन्निःश्वासमात्रेण स्वयमेव भव
तीति तथा च श्रुतिः अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेद इति ४० कोऽसौ नारायणः तत्राहुः येन स्वधाम्नि स्वस्व
रूपे अमी भावाः प्राणिनः गुणाः शान्तत्वादयः नामानि ब्राह्मण इत्यादीनि क्रियाः अध्ययनाद्याः रूपाणि वर्णाश्रमादयः ते
र्विभाव्यन्ते व्यक्तिं नीयन्ते यथातथं यथावत्स नारायणः ४१ तथाप्यधर्मे न न कृत इति कुतो ज्ञायते तत्राहुः सूर्य इति अह
नी अहश्च रात्रिश्च कं उदकं कुः पृथ्वी दैह्यस्य जीवस्य यथाहुः आदित्यचन्द्रावनिलोऽनलश्च द्यौर्भूमिरापो हृदयं यमश्च अह
श्च रात्रिश्च उभे च संध्ये धर्मश्च जानाति नरस्य वृत्तमिति ४२ स्थानमाहुः एतैर्निमित्तभूतैर्विज्ञातः दंड्यानाहुः सर्व इति ४३
विपरीतानि अभद्राण्यपि कर्मिणां संभवंति यतः तेषां गुणसंयोगोऽस्ति यदि कश्चिदकर्ता स्यात्तर्हि तस्याभद्राणि न स्युः न चैतदस्तीत्याहुः नहि देहवान्न कर्मकृदस्तीति अतः सर्वे

कर्मिणः कर्मिणोऽवपापस्यावश्यंभावित्वात्ते सर्वे दंडमर्हंतीत्यर्थः ५४

कर्तुं स्वितत्प्रियेतेदं इत्यस्योत्तरं येनेति धर्मो वेति दृष्टान्तः प्रथमं नानुसारेण देहे धर्मानुसारेणास्तु च वदित्यर्थः ४५ न के
वलस्य धर्मादय एव ज्ञापकाः किन्तु धर्मापत्तिरपीत्याहुः यथेति इह देवप्रवराः इहजन्मनि शान्तत्वादिभूतत्वेन वा स्त्राविरुद्धाः त्रि
मिश्रत्वेन वा धार्मिकत्वादिना वा त्रैविध्यं भूतेषु यथोपलभ्यन्ते तथान्यत्र जन्मान्तरे नुमीयन्ते त्रैविध्यान्यथानुपपत्त्या कल्प्य
न्ते ४६ वर्तमानजन्मना पूर्वापरजन्मधर्माधर्मज्ञानं भवतीति सदृष्टान्तमाहुः वर्तमानो वसन्तादिकालः अन्ययोर्भूतभ
विष्यतोर्वसन्तयोर्ये गुणाः पुष्पफलादयः तेषामभिज्ञापको यथा एवमेतज्जन्म अन्ययोर्भूतभाविजन्मनोर्धर्माधर्मनिद
र्शयतीति तथा ४७ अथैवं धर्माधर्मज्ञानप्रकारान्येषां धर्मराजस्तु मनसैव सर्वं पश्यतीत्याहुः परमेवमिथ्यास्थितमेव

येन यावान् यथाधर्मो धर्मो वेह समीहितः स एव तत्फलं भुङ्क्ते तथा तावदमुत्र वै ४५ यथेह देवप्रवराः त्रै
विध्यमुपलभ्यते भूतेषु गुणवैविध्यात् तथान्यत्रानुमीयते ४६ वर्तमानोन्ययोः कालो गुणाभिज्ञापको यथा
एवं जन्मान्ययोरेतत् धर्माधर्मनिदर्शनम् ४७ मनसैव पुरा देवः पूर्वं रूपं विपश्यति अनुमीमांसते पूर्वं
मनसा भगवानजः ४८ यथात्मा तमसा युक्त उपालब्धक्रमेव हि न वेद पूर्वमपरेण तज्जन्मस्मृतिस्तथा
४९ पञ्चभिः कृतैस्तस्यार्थो नैव वेदात्मपञ्चभिः एकस्तु षोडशेन जीवः स्वयं समदर्शनः ५० तदेतन्मोह
शकलं लिङ्गं प्रकृतिरूपं महत् धत्ते नु संसृतिं प्रसिद्धं [illegible] शोकभयाविदा ५१ देहसंज्ञोजितषड्गुणैवच्छन्नक
र्माणि कार्यमे कोशाकार इवात्मानं कर्मणाच्छाद्य मुह्यति

देवो मनः देहे स्थितो न तर्यामी वा जीवस्य पूर्वं रूपं धर्माधर्मादियुक्तं विशेषेण पश्यति अनु पश्चान्नेतरमपूर्वं रूपं मीमांसते य
द्यस्मान्तु रूपं तत्तु विचारयति यतो मां भगवानजः ४८ जीवस्त्वीश्वरेणापस्थापितं वर्तमानं देहं पश्यति नतु पूर्वमपरं वे
त्याहुः यथेति अत्र तः अविद्योपाधिजीवस्तु व्याकृतमेव प्राचीनं कर्माभिव्याकृतं वर्तमानमेव देहाद्युपालब्धं मिति मन्यते पूर्वे
मपरं वा न वेद पूर्वदेहे नष्टाजन्मना स्मृतिर्यस्मात् दृष्टान्तः तमसा तिद्रया युक्तो यथा स्वप्नाभिव्याकृतमेव देहाद्युपालब्धं न तु
जाग्रद्देहादि पूर्वं स्वप्नादिगतं वा न वदेदित्यर्थः ४९ एवंभूतस्य जीवस्य संसारं प्रपञ्चयन्ति पञ्चभिः श्लोकैः पञ्चभिः कर्मेन्द्रियैः
स्वार्थाननुपादानादीन् रूपं च शब्दादीन् वेद पञ्चभिर्ज्ञानेन्द्रियैः षोडशेन मनसा सह समदशः षोडशपात्मनगतोपि स्वयमेक
स्त्वेव सर्वेन्द्रियविषयानि [illegible] कर्मेन्द्रियज्ञानेन्द्रियमनोविद्या [illegible] भाति ५० तदेतल्लिङ्गशरीरं प्रकृतिरूपगुणत्रय
कार्यं महदनादि प्रसिज्जीवे [illegible] संसृतिं धत्ते ५१ नेवत्वं प्रतिबन्धोऽपि नेव कर्माणि कार्यते कोशाकारः कीटविशेषः मुह्यति निर्गमोपायं न जानाति ५२

श्रीः
भा० ष०
टी०
६

कार्यत इत्यत्र तु भवं च भासयति न ह्रीति गुणैर्गुणात्कार्यरागादिभिः स्वाभाविकैः पूर्वकर्मसंस्कारोद्भूतैः ५३ कर्मवशेन वर्तत इत्य
त्रोपादेहो भवतीत्याह लब्ध्वेति अव्यक्तं महदृष्टं निमित्तं लब्ध्वा व्यक्ताव्यक्तं तदनुरूपस्थूलसूक्ष्मशरीरं भवति यथा योनि मातृस
दृशं यथाबीजं पितृसदृशं स्वभावो वासनास्तु शुक्रशोणितयोरेकत्वेपि कर्मवासनया मातृपितृसदृशं यथाबीजं पितृसदृशं
स्वभावो वासनास्तु शुक्रशोणितयोरेकत्वेपि कर्मवासनया मातृपितृसदृशो देहो भवतीत्यर्थः ५४ संसारश्च क्षुमसंगहवतो मुमु
क्षुः इत्यकारणमाह एष इति ईशसंगात् परमेश्वरभजनात् ५५ तदेवं सामान्यतो धर्मादिनिर्णयमुक्त्वा प्रस्तुतस्याजामिलस्या
धर्मं प्रपंचयन्तो देह्यत्रवमाह अयं हीति यावदध्यायसमाप्तिः तद्द्वाभ्यां तस्य वेदोक्ताचारानुवादो न्यायातिरेकप्रदर्शनार्थः

न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत् कार्यते ह्यवशः कर्म गुणैः स्वाभाविकैर्बलात् ५३ लब्ध्वा नि
मित्तमव्यक्तं व्यक्ताव्यक्तं भवत्युत यथायोनि यथाबीजं स्वभावेन बलीयसा ५४ एष प्रकृतिसंगेन पुरुषस्य
विपर्ययः आसीत्स एव न चिरादीशसंगाद्विलीयते ५५ अयं हि श्रुतसम्पन्नः शीलवृत्तगुणालयः धृ
टी० तव्रतो मृदुर्दान्तः सत्यवान्मन्त्रवित्शुचिः ५६ गुर्वग्न्यतिथिवृद्धानां शुश्रूषुरनहंकृतः सर्वभूतसुहृत्सा
षष्ठस्कंधे धुर्मितवागनसूयकः ५७ एकदासौ वनं यातः पितृसन्देशकृद्द्विजः आदाय तत आवृत्तः फलपुष्पस
मित्कुशान् ५८ ददर्श कामिनं कंचिच्छूद्रं सह भुजिष्यया पीत्वा च मधु मैरेयं मदाघूर्णितनेत्रया ५९ मत्त
या विश्लथन्नीव्या व्यपेतं निरपत्रपं क्रीडन्तमनुगायन्तं हसन्तमनयान्तिके ६० दृष्ट्वा तां कामलिप्तेन बाहु
ना परिरंभितां जगाम हृच्छयवशं सहसैव विमोहितः ६१ स्तंभयन्नात्मनात्मानं यावत्सत्त्वं यथाश्रुतं न
शशाक समाधातुं मनो मदनवेपितं ६२ तन्निमित्तस्मरव्याजग्रहग्रस्तो विचेतनः तामेव मनसा ध्यायन्
स्वधर्माद्विरराम ह ६३ ॥

शीलं सत्स्वभावः वृत्तं सदाचारः गुणाः क्षमादयः तेषामालयः ५६ निरहंकृतो निरहंकारः ५७ आवृत्तः वनात्परा
वृत्तः ५८ भुजिष्यया भोगस्त्रिया दास्या मैरेयं मधु पीत्वा यया पीता मदेनाघूर्णिते भ्रांते नेत्रे यस्याः ५९ विश्लथंत्यः स्ल
थंती नीवी यस्याः तया सह व्यपेतं स्वाचारात्भ्रष्टं ६० कामोद्दीपकेन तदंगरागेण हरिद्रादिना लिप्तेन ६१ सत्त्वं धैर्यं
श्रुतं ज्ञानं तद्बलेन स्तंभयन्नपि मदनेन कंपितं मनः समाधातुं न शक्तोभूत् ६२ तद्दर्शनमेव निमित्तं यस्य स्मरव्या
जस्य ग्रहस्य तेन ग्रस्तः विचेतनो यत स्मृतिः ६३ यावता समग्रेण ६४

त्वेभितं यपरिणीतं ६५ ६६ अब्रवृषमायुर्यस्यमलमेवनदीयमन्त्रादिकमत्तीनिमलात् ६७ अकृतनिर्वेशोऽकृतप्रायश्चि
त्तेऽस्मैवचहिवार्थेनेष्याम इत्याहुः यत्रेति ६८ इति भावा दीपि षष्ठ स्कंधे प्रथमो ऽः १ द्वितीये वैसवेपी.
ध्यानाममाहात्म्यमद्भुतं श्रावयित्वा द्विजो विष्णोर्लोकं नीतस्तं नीयते नयकोविदाः न्यायनिपुणाः १ धर्मदृशां सभाम्.
धर्मः स्पृशतीति तदाह यत्र सभायां यैः धर्मदृग्भिः तेषां तां सभां २ पितरः पितृवत्पालकाः शास्तारः अनुशिक्षकाः वै

विप्रं स्वभार्यामप्रौढां कुले महति लंभितां विससर्जाचिरात्पापः स्वैरिण्यापांगविद्धधीः ६५ यतस्ततश्चो
पनिन्ये न्यायतोन्यायतो धनं बभारास्याः कुटुंबिन्याः कुटुंबं मन्दधीरयं ६६ यदसौ शास्त्रमुल्लंघ्य स्वैरचा.
र्यतिगर्हितः अवर्तत चिरं कालमघायुरशुचिर्मलात् ६७ तत एनं दण्डपाणेः सकाशं कृतकिल्बिषं नेष्या
मोऽकृतनिर्वेशं यत्र दंडेन शुद्ध्यति ६८ इति भाग षष्ठ स्कंधे प्रथमो ऽः १ बादरायणिरुवाच एवं
ते भगवद्दूता यमदूताभिभाषितं उपधार्याथ तान्राजन्प्रत्याहुर्नयकोविदाः १ विष्णुदूता ऊचुः अहो क.
ष्टं धर्मदृशामधर्मः स्पृशते सभां यत्रादंड्येष्वपापेषु दंडो यैर्ध्रियते वृथा २ प्रजानां पितरो ये च शास्तारः सा
धवः समाः यदि स्यात्तेषु वैषम्यं कं यान्ति शरणं प्रजाः ३ यद्यदाचरति श्रेयानितरस्तत्तदीहते स यत्प्रमाणं
कुरुते लोकस्तदनुवर्तते ४ यस्यांके शिर आधाय लोकः स्वपिति निर्वृतः स्वयं धर्ममधर्मं वा न हि वेद यथा
पशुः ५ स कथं न्यर्पितात्मानं कृतमैत्रमचेतनं विस्रंभणीयो भूतानां सघृणो दोग्धुमर्हति ६ अयं हि कृ
तनिर्वेशो जन्मकोट्यंहसामपि यद्व्याजहार विवशो नाम स्वस्त्ययनं हरेः ७

धर्म्यमदंड्यदंडनं ३ यतस्त्ववर्तितमध्यमं मन्यमानोऽपि करिष्यतीति महत्कष्टमपदित्याहुः यद्यदिति श्रेयानुत्तमः ४ वि
श्वस्तघाततां दर्शयन्नाहुः यस्येति द्वाभ्यां निर्वृतो निश्चिंतः ५ विश्वासेन नितरामर्पित आत्मा येन तं विस्रंभणीयः विश्व
सनीयः सघृणश्चेत् ६ ननु स्यापि नादंड्यत्वं किं मध्यमाक्रोशः क्रियते तत्राहुः अयं हीति यद्यस्मात् विवशोऽपि हरेर्नाम
व्याजहार उच्चारितवान् न केवलं प्रायश्चित्तमात्रं हरेर्नामग्रहणं किं तु स्वस्त्ययनं मोक्षसाधनमपि सकृदुच्चारितेन यन्नहरि
रित्यक्षरद्वयं बद्धः परिकरस्तेन मोक्षाय गमनं प्रतीति स्मृतेः ७ नत्वकर्मसाकल्यपकं हरेर्नामेति शुद्धं यस्य
स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु न्यूनं संपूर्णतां याति सद्यो वंदे तमच्युतं इत्यादिवचनात् स्मार्तत्वेनव

निवर्तकं हरेर्नाम कथं स्यादित्याशङ्क्य: एतेनैवेति त्रिभिः अघोनः अघवतः मघवन्शब्दवद्रूपं यत्स्मादिति छेदः आईषन्नामाभास
मात्रेणैवतरत्तरं यज्जगाद एतेनैव केवलेन चतुरक्षरमित्यनेनाधिक्यं दर्शितं कथं जगाद नारायणाय आगच्छ
इत्येवं विकृष्टशब्दरूपेण पुत्राह्वानेनास्य भावः कर्माङ्गत्वेऽपि हविर्नाम्नः स्वाहादिवत्संयोगपृथक्त्वेन सर्वथा प्रायश्चित्तार्थत्व
मुक्तमेव तथाहि श्रवणेनापि यज्ञाग्निकीर्तिते सर्वपातकैः पुमान् विमुच्यते सद्यः सिंहत्रस्तैर्मृगैरिवेत्यादिभिः पुराणे।
तावन्मात्रस्य ग्रहणान्नाम्नः स्वातन्त्र्यमवगम्यते न चैतेऽर्थवादा इति शङ्कनीयं विधिशेषत्वाभावात् न च विध्यश्रवणादन्यशेष
त्वाकल्पनीया यदाग्नेयोऽष्टाकपालो भवतीत्यादिवद्यथार्थत्वेन विधिकल्पनोपपत्तेः मनेश्च वमनोऽस्मत्प्यस्य तेश्च विनाम

एतेनैव ह्यघोनोऽस्य कृतं स्यादघनिष्कृतं यदा नारायणायेति जगाद चतुरक्षरं ८ स्तेनः सुरापो मित्रध्रुक्
ब्रह्महा गुरुतल्पगः स्त्रीराजपितृगोहन्ता ये च पातकिनोऽपरे ९ सर्वेषामप्यघवतामिदमेव सुनिष्कृतं
नामव्याहरणं विष्णोर्यतस्तद्विषया मतिः १० न निष्कृतैरुदितैर्ब्रह्मवादिभिस्तथा विशुद्ध्यत्यघवान् व्रता
दिभिः यथा हरेर्नामपदैरुदाहृतैस्तदुत्तमश्लोकगुणोपलम्भकं ॥ नैकान्तिकं तद्धि कृतेऽपि निष्कृते मनः पु
नर्धावति चेदसत्पथे तत्कर्मनिर्हारमभीप्सतां हरेर्गुणानुवादः खलु सत्त्वभावनः १२ ॥

मनामहे विष्णोस्ते जातवेदसः अस्य जानन्तो नाम चिद्विविक्तनेत्यादिषु नामसंकीर्तनादिसर्वधर्माधिक्यमवगम्यते उपपा
दितं च मया श्रीधरीयेनामपि स्वार्थे प्रमाणं पदेवनाधिकरणे तस्मात् श्रीनारायणनामाभासमात्रेणैव सर्वाघनिःकृतेः कृत
मस्मादिति ८ ननु कामकृतानां बहूनां महापातकानां सहस्रशः प्रावृत्तिनां द्वादशवार्षिकादिभिरप्यनिवर्त्यानां कथ
मिदमेकमेव प्रायश्चित्तं स्यात् तत्राह स्तेन इति द्वाभ्यां ९ सुनिष्कृतं सुष्ठु प्रायश्चित्तमिदमेवेत्यत्र हेतुः यतो नामव्याहर
णात् तद्विषया नामोच्चारकपुरुषविषया मदीयोऽयमिति सर्वतो रक्षणीय इति विष्णोर्मतिर्भवति १० अत एव नैवोपप
द्यते इति द्वाभ्यां ब्रह्मवादिभिर्मन्वादिभिरुक्तैर्व्रतादिभिर्निष्कृतैः तथा न शुद्ध्यति उदाहृतैरुच्चारितैर्यथा नामपदैरित्य
नेन नामामीत्यादि क्रियायोगो विनापि हितं इति दर्शितं किं च तन्नामपदोच्चारणं उत्तमश्लोकस्य गुणानां चोपलम्भकं नामकं भवति न तु कृच्छ्रचान्द्रायणादिवत्पापनिष्कृति
मात्रोपक्षीणमित्यर्थः ॥ नैकान्तिकं नात्यन्तशोधकं तत्त्रिकृते प्रायश्चित्ते कृतेऽपि मनः सत्पथे धावति चेत् कर्मणां पापानां निर्हारमात्यन्तिकनाशमिच्छतां
हरेर्गुणानुवाद एव प्रायश्चित्तं यतोऽसौ खलु सत्त्वभावनः चित्तशोधकः १२ ॥

मुच्यते तस्मादेनं मा नयत यमामार्गेण मा नयत कृतमशेषाणामघानां निष्कृतं येन यद्यस्मात् समग्रहीत् सम्यग्गृहीतवान् तदुच्चारितवान् नाम्नै
कदेशेनाप्यलमिति भावः म्रियमाण इत्यनेन पुनः पापान्तरासंभव उक्तः न तु न कालान्तरेमेव विवक्षितं तदानीं कृच्छ्रादिवि
धिवन्नामोच्चारणविधेरप्यसंभवात् न च विधिं विना काकतालीयनामोच्चारणं पापापहमिति भ्रमणमस्ति १३ ननु च
यं पुत्रनामाग्रहीत् न तु भगवन्नाम तत्राह सांकेत्यं पुत्रादौ संकेतितं पारिहास्यं परिहासेन कृतं स्तोभं गीतालापपूरणा
र्थं कृतं हेलनं किं विष्णुनेति सावज्ञं तदपि वैकुण्ठनामोच्चारणं १४ ननु नायं संकल्पपूर्वकं वैकुण्ठनामाग्रहीत् किंतु पुत्रस्ने
हपरवशः सन् तत्राह पतित इति अवशेनापि यो हरिरित्याह स यातनां नार्हतीति पुमानित्यनेन नात्र वर्णाश्रमादिनियमः

अथैनं मापनयत कृताशेषाघनिष्कृतिं यदसौ भगवन्नाम म्रियमाणः समग्रहीत् १३ सांकेत्यं पारि
हास्यं वा स्तोभं हेलनमेव वा वैकुण्ठनामग्रहणमशेषाघहरं विदुः १४ पतितः स्खलितो भग्नः संदष्टस्त
प्त आहतः हरिरित्यवशेनाह पुमान्नार्हति यातनाः १५ गुरूणां च लघूनां च गुरूणि च लघूनि च प्राय
श्चित्तानि पापानां ज्ञात्वोक्तानि महर्षिभिः १६ तैस्तान्यघानि पूयन्ते तपोदानजपादिभिः नाधर्मजं तद्धृदयं
तदपीशाङ्घ्रिसेवया १७ अज्ञानादथवा ज्ञानादुत्तमश्लोकनाम यत् संकीर्तितमघं पुंसो दहेदेधो यथान
लः १८

न्तुकं प्रवशत्वमेवाह पतितः प्रासादादिभ्यः स्खलितो मार्गे भग्नो भग्नगात्रः संदष्टः सर्पादिभिः तप्तो ज्वरादिना आहतो दण्डादि
ना १५ ननु महतः पापस्य महदेव प्रायश्चित्तं युक्तं न त्वल्पं नामग्रहणमात्रं पापतारतम्येन कृच्छ्रादिना तारतम्यवचनात् तत्रा
ह द्वाभ्यां गुरूणां पापानां गुरूणि प्रायश्चित्तानि लघूनां लघूनीति तावत्सत्यं ज्ञात्वा मन्वादिभिरुक्तानि सन्ति तथैवेद
स्यात् विना [illegible] स्मरणमात्रेण मुच्यते सर्वपातकैरिति वचनात् न च स्वल्पविद्रूपेन महापातक
वत्स्मरणवत् प्रायश्चित्तं स्यायमिति भावः १६ किंचैतत्तपोदानादिभिस्तान्यघान्येव पूयन्ते न पूयन्ते तदधर्मा
न्मालिनेन तस्य पापस्य कर्तुर्हृदयं यद्वा तेषामज्ञानां हृदयं संस्कारान्न तु पूयते संस्काराद्वेन शुध्यति तदपीशाङ्घ्रिसेवया कीर्तना
दिना शुध्यतीत्यर्थः अयं भावः महान्त्यपि पापानि सकृदुच्चारितेन नाम्ना नश्यन्ति सकृत्प्रवृत्तेन दीपेनेव गाढध्वान्तानि
तदाहृत्य तत्पापोत्तरस्यानुवृत्तिः दीपधारणाइवत् ततस्तु वासनानुवृत्ततद्धृदयशुद्धिः एतदर्थमेव तत्तन्नामावृ
त्तिविधानं यथाशक्त्याहुः भगवत्स्मृतीनां तन्नामसंकीर्तनादिष्वित्यादि तु तदेवाप्युक्तं गुणानुवादः खलु सत्त्वभावनः तदपीशाङ्घ्रिसेवयेति कस्मात् स्मृतिरेव सर्वपापहरः वासना
नयस्तु महापुरुषदर्शनादिभिरिति १७ तथापि पापप्रायश्चित्तमिदमिति ज्ञात्वोच्चारितमिति चेत्तत्राह अज्ञानादिति वालकेनाज्ञानादपि प्रक्षिप्तोऽग्निर्यथा काष्ठरा

[illegible] २ ८

श्रीः
भा० ष०
टी०
६

न विदन्त्यपि पूर्वैरनुपदिष्टं श्रद्धाहीनं च कथं प्रशस्तं स्यात्तत्राह यथेति अगदमौषधं वीर्यवत्तममित्युक्ते यदृच्छ
या श्रद्धादिहीनेऽप्युपयुक्तं भक्षितं तु याथार्थ्यमजानतोऽपि स्वगुणमारोग्यं करोत्येवं मन्त्रोऽपि नामात्मकः तथा स्वकार्यं करोत्येव न
हि वस्तुशक्तिः श्रद्धादिकमपेक्षत इत्यर्थः तदुक्तं विष्णुधर्मे हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः अनिच्छयापि सं
स्पृष्टो दहत्येव हि पावक इति १८ तं विप्रममूमुचन् भावयामासुः १९ प्रत्युदिता निराकृताः सन्तः यामराजाय यमरा
जाय यथावत्कथयामासुः २० दर्शनेनात्मोत्सवो यस्य २१ विवक्षुं वक्तुमिच्छन्तं ज्ञात्वा २२ त्रैविद्यं वेदत्रयप्रतिपाद्यं गु

यथागदं वीर्यतममुपयुक्तं यदृच्छया । अजानतोऽप्यात्मगुणं कुर्यान्मन्त्रोऽप्युदाहृतः १८ श्रीशुक उवाच । त
एवं सुविनिर्णीय धर्मं भागवतं नृप । तं याम्यपाशान्निर्मुच्य विप्रं मृत्योरमूमुचन् १९ इति प्रत्युदिता या
म्या दूता यात्वा यमान्तिकम् । यमराज्ञे यथा सर्वमाचचक्षुररिन्दम २० द्विजः पाशाद्विनिर्मुक्तो गतभीः प्रकृ
तिं गतः । ववन्दे शिरसा विष्णोः किङ्करान्दर्शनोत्सवः २१ तं विवक्षुमभिप्रेत्य महापुरुषकिङ्कराः । सह
सा पश्यतस्तस्य तत्रान्तर्दधिरेऽनघ २२ अजामिलोऽप्यथाकर्ण्य दूतानां यमकृष्णयोः । धर्मं भागवतं शुद्धं
त्रैविद्यं च गुणाश्रयम् । भक्तिमान्भगवत्याशु माहात्म्यश्रवणाद्धरेः । अनुतापो महानासीत्स्मरतोऽशुभ
मात्मनः २४ अहो मे परमं कष्टमभूदविजितात्मनः । येन विप्लावितं ब्रह्म वृषल्यां जायतात्मना २५
धिङ्मां विगर्हितं सद्भिर्दुष्कृतं कुलकज्जलम् । हित्वा बालां सतीं योऽहं सुरापामसतीमगाम् २६ वृद्धा
वनाथौ पितरौ नान्यबन्धू तपस्विनौ । अहो मयाधुना त्यक्तावकृतज्ञेन नीचवत् २७ सोऽहं व्यक्तं पतिष्यामि
नरके भृशदारुणे । धर्मघ्नाः कामिनो यत्र विन्दन्ति यमयातनाः २८ इदानीं तस्य विमर्शपूर्वकं मोक्षक्रम
माह किमिदमित्यष्टभिः । किमिदं स्वप्न आहो स्वित्साक्षाद्दृष्टमिहाद्भुतम् । क्व याता अद्य ते ये मां व्यकर्षन्
पाशपाणयः २९

णाश्रयं यमदूतानां धर्मं कृष्णदूतानां च भागवतं भगवत्प्रणीतं शुद्धं निर्गुणं यमेभ्यः कार्यमिति शोध्यं भक्तिमानासी
दित्युत्तरस्यानुषङ्गः २३ २४ अनुतापमेव प्रपञ्चयति अहो इति दशभिः येनात्मना मया वृषल्यां जनयता जायमा
नेन ब्रह्म ब्राह्मण्यं जातिः विप्लावितं नाशितं २५ दुष्कृतं दोषकर्तारं कुलस्य कज्जलं कलङ्कम् २६ नास्ति अन्यो ब
न्धुः पुत्रादिर्ययोः तपस्विनौ असमर्थौ अधुना त्यक्तावेव २७ इदानीं तस्य विमर्शपूर्वकं मोक्षक्रममाह कि
मिदमित्यष्टभिः साक्षात्स्वप्नवदिदं जाग्रद्वा दृष्टम् २९ ये मां व्यकर्षन् ते क्व गताः ३० ॥

६

यद्यप्यहमस्मिंजन्मनि दुर्भगः पापीयान् अथापि जन्मान्तरेऽनेनैव पुण्यवानित्याह विबुधोत्तमदर्शन इति निमित्तसप्त
मी तेषां दर्शनेऽपि सर्वेण मंगलेन हताशेषेण भवितव्यं येन दर्शनेन ३१ अन्यथा अवशेषपुण्यं विना कथं अतो वैकुंठना
म गृह्यते वशीक्रियते अनेनेति ग्रहणं ब्रह्मघ्नः विप्रवधकः ३३ ३६ मिथ्यार्थे धीर्यस्य तथाभूतः सन् देहा
दौ ममाहमिति मतिं हित्वा धास्ये ३७ मुक्तं सर्वमनुबन्धनं पुत्रादिस्नेहो येन सः ३८ प्रत्याहृत इन्द्रियग्रामो येन ३९ गु

अथापि दुर्भगस्य विबुधोत्तमदर्शने भवितव्यं मंगलेन येनात्मा मे प्रसीदति ३१ अन्यथा म्रियमाणस्य ना
शुचेर्वृषलीपतेः वैकुंठनामग्रहणं जिह्वा वक्तुमिहार्हति ३२ क्व चाहं कितवः पापो ब्रह्मघ्नो निरपत्रपः
क्व च नारायणेत्येतद्भगवन्नाम मंगलम् ३३ सोहं तथा यतिष्यामि यतचित्तेंद्रियानिलः यथा न भूय
आत्मानमन्धे तमसि मज्जये ३४ विमुच्य तमिमं बन्धमविद्याकामकर्मजम् सर्वभूतसुहृच्छान्तो मै
त्रः करुण आत्मवान् ३५ मोचये ग्रस्तमात्मानं योषिन्मय्यात्ममायया विक्रीडितो ययैवाहं क्रीडामृग
इवाधमः ३६ ममाहमिति देहादौ हित्वा मिथ्यार्थधीर्मतिं धास्ये मनो भगवति शुद्धं तत्कीर्तनादिभि
३७ शुक उवाच इति जातसुनिर्वेदः क्षणसंगेन साधुषु गंगाद्वारमुपेयाय मुक्तसर्वानुबन्धनः ३८ स
तस्मिन्देवसदन आसीनो योगमाश्रितः प्रत्याहृतेंद्रियग्रामो युयोज मन आत्मनि ३९ ततो गुणेभ्य आ
त्मानं वियुज्यात्मसमाधिना युयुजे भगवद्धाम्नि ब्रह्मण्यनुभवात्मनि ४० यर्ह्युपारतधीस्तस्मिन्नद्राक्षी
त्पुरुषान्पुरः उपलभ्योपलब्धान्प्राग्ववंदे शिरसा द्विजः ४१ हित्वा कलेवरं तीर्थे गंगायां दर्शनादनु स
द्यः स्वरूपं जगृहे भगवत्पार्श्ववर्तिनाम् ४२ साकं विहायसा विप्रो महापुरुषकिंकरैः हैमं विमानमारु
ह्य ययौ यत्र श्रियः पतिः ४३ एवं स विप्लावितसर्वधर्मा दास्याः पतिः पतितो गर्ह्यकर्मणा निपात्यमानो
निरये हतव्रतः सद्यो विमुक्तो भगवन्नाम गृह्णन् ४४ नातः परं कर्मनिबन्धकृन्तनं मुमुक्षतां तीर्थपदानु

णेभ्यो देहेन्द्रियादिभ्य आत्मानं वियुज्य विशोध्य आत्मसमाधिना चित्तैकाग्र्येण भगवतो धाम्नि स्वरूपे ४० तस्मिन्भगव
द्धाम्नि उपरता निश्चला धीर्यस्य सः तस्मिन्काले द्राक्षीदिति वा पुरः पुरतः तत्स्वप्नादि उपलब्धानेव तानुपलभ्य प्रणति
मित्याय ववन्दे ४१ ४२ उपसंहरति एवमिति द्वाभ्यां विप्लावितः सर्वधर्मो येन हतं व्रतं सदाचारनियमादि यस्य ४४

श्री:
भा॰ ष॰
टी॰ 7

कर्मनिबन्धस्यपापमूलस्यकृंतनंछेदकमतःपरंनास्तिकस्मात्परंतीर्थपादस्यानुकीर्तनात् तत्रहेतुःयद्यतोनुकी
र्तनात् ततोनुकीर्तनादन्यथाप्रायश्चित्तान्तरैरजस्तमोभ्यांकलिलंमलिनमेवतिष्ठतीतियत्नमनः ४६ नवीक्षितो
भवति ४२ म्रियमाणःपुत्रस्नेहेनपुत्राद्याविष्टोनापि ४९ इति वाधे पिका षष्ठ येद्विती ध्याय २ तृतीये
तयमेनापिवैष्णवोत्कर्षवर्णनैः मानवपिमास्महतास्तेवस्वेर्वकिंकरीकृताः विस्मृतैर्निर्णीतंशास्त्रार्थंयमनुते
नद्रष्टयितुंतत्तीयाध्यायारंभःतत्रयदुक्तं यमराजेनयथासर्वमाचचक्षिरेतेततः किंतत्र्यक्तमितिपृच्छतिनिशम्य
म्यनिस्तुरारेर्नैदशिकैः किंकरैर्विहितान्श्रुतएवहताज्ञातायस्यवशावर्तीअयंजनः सोपितान्प्रतिकिमाह १
अत्याश्चर्यमेतदित्याहयमस्येति हेऋषेयमस्यदंडभंगःकुतश्चनकस्मादपिश्रुतपूर्वोनासीत् एतस्मिन्नर्थे।

यएवंपरमंगुह्यमितिहासमघापहं श्रृणुयाच्छ्रद्धयायुक्तोयश्चभक्त्यानुकीर्तयेत् ४६ नवैसनरकंया
तिनेक्षितोयमकिंकरैः यद्यप्यमंगलोमर्त्योविष्णुलोकेमहीयते ४७ म्रियमाणोहरेर्नामगृणन्पुत्रोपचा
रितं अजामिलोप्यगाद्धामकिंपुनःश्रद्धयागृणन् ४८ इति भाग तेषष्ठस्कं द्विती ध्यायः २
राजोवाच निशम्यदेवःस्वभटोपवर्णितंप्रत्याहकिंतान्प्रतिधर्मराजः एवंहताज्ञोविहितान्मुरारेर्नैदेशि
कैर्यस्यवशेजनोयम् १ यमस्यदेवस्यनदंडभंगःकुतश्चनर्षेश्रुतपूर्वआसीत् एतन्मुनेवृश्चतिलोक
संशयंनहित्वदन्यइतिमेविनिश्चितं २ शुकउवाच भगवत्पुरुषैराजन्याम्याःप्रतिहतोद्यमाः पतिंविज्ञा
पयामासुर्यमंसंयमनीपतिं ३ यमदूताऊचुः कतिसंतीहशास्तारोजीवलोकस्यवैप्रभो त्रैविध्यंकुर्वतः
कर्मफलाभिव्यक्तिहेतवः ४ यदिस्युर्बहवोलोकेशास्तारोदंडधारिणः कस्यस्यातांनवाकस्यमृत्यु

यद्वानपूर्णमिदंसर्वमेतद्यमस्यहतनिराकरणाचासीत् अतःसर्वस्यापिलोकस्यसंशयोवर्तते नचत्वत्तोन्योवक्तुंक्षमइति
मेनिश्चितंअतःकथयेतिशेषः २ भगवतःपुरुषैःप्रतिहतउद्यमोयेषांतेयम्यापुरुषाः ३ कतिसंतीत्यादिपंक्तिःत्रैवि
ध्यं सात्विकराजसतामसत्वात्त्रैविध्यंयथाभवतितथाकर्मकुर्वतः तथैवकर्मफलस्याभिव्यक्तिहेतवःकतिसंतीति ४ स
न्तुबहवःकोवाधःतत्राहुःयदीतिमृत्युर्दुःखंअमृतंसुखंतेयोर्विप्रतिपत्तौतेउभेकस्यस्यातांनकस्यापिपरस्परविरोधे
नोभयोरपिघातित्वात् एकमन्येनकस्यवानस्यातांएकःसुखंकर्त्तुमिच्छतिदंडःखंचान्यः एकमन्येवनयाघ्नस्य

चामृतमेववा ५

एकार्यानुमोदनेनोभयोरपिघातकस्यवानेतैश्चिनस्यातामि
त्यर्थः ५

ननु बहूनां कर्मिणां व्यवस्थया शास्त्रवशत्वे शास्तृत्वं स्यात् बहवः शास्तारो भवंतीति यास न तिनायं दोषः स्यात् तत्राह बहू
नां कर्मिणां व्यवस्थया शास्त्रवशत्वे शास्तृत्वं स्यात् तद्यदेतत् किंतु तदा यत्सर्वशास्तरि मुख्यं शास्तृत्वं तदेकदेश उपचारमात्र
मेव स्यात् यथा चक्रवर्तिन एव मुख्यं शास्तृत्वं मंडलवर्तिनां उपचारमात्रं निरंकुशत्वाभावात् ६ यस्मादेवं शास्त्रवशत्वेन
यदेतेऽतस्त्वमेक एव शास्ता शुभाशुभविवेकोऽसीति यथा ७ विप्रलंभिना वंचितानां चिंतेत्यर्थः ८ तदेवाह नेयमानं
मिति ९ तेनत्वं यदि नोऽस्माकं त्वं मे हितं मन्यसे अन्यथा तानेनत्वं सदवज्ञां मे तया वाच्यं न स्यात् अतः कोऽपि हितेषां प्रभावः
यतो नाशयनायेति केवलमभिहितोऽमा भयं उरु इति वदतः शीघ्रमागताः १० मेयमय नीतीतियामन्नोन्योजगत स्रष्टु

किं न शास्त्रवशत्वे स्याद्बहूनामिह कर्मिणां शास्तृत्वमुपपन्नं हि यथा मंडलवर्तिनां ६ अतस्त्वमेको भूतानां
मीश्वराणामधीश्वरः शास्ता दंडधरो नृणां शुभाशुभविवेचनः ७ तस्य ते विहितो दंडो न लोके वर्तते शुभा व
र्तमेव तु तेः सिद्धवज्जाते विप्रलंभिना ८ नीयमानेन वादे ध्यादस्माभिर्यातना गृहात् यमोऽयं यन्मा किं तद्वि
द्याया शास्त्रमहेत ९ नास्त्र वादितमिच्छामो यदि नो मन्यसे त्वं मं नावाप्यणोऽभिहितं माभैष्यायघुडेन १०
मृकुडवाय इति देवसत्वाप्तष्टः प्रजासंयमनो यमः प्रीतः सहतान्प्रत्याह स्मरन्पादांबुजं हरेः ११ यम उवाच
व परो मदन्यो जगतस्तस्थुषश्च ओतं प्रोतं पटवद्यत्र विश्वं यदंशतोऽस्य स्थितिजन्मनाशान् नस्योतवद्यस्य वशे च
लोकः १२ यो नामभिर्वाचि जनान्निजायां वध्नाति तन्त्यामिवदामभिर्गाः यस्मै बलिं त इमे नामकर्म निबन्ध
बद्धाश्चकितावहंति १३ अहं महेंद्रो निरृतिः प्रचेताः सोमोऽग्निरीशः पवनो विरिंचिः आदित्यविश्वे वस
वोऽथ साध्या मरुद्गणा रुद्रगणाः ससिद्धाः १४ अन्ये च ये विश्वसृजोऽमरेशा भृग्वादयोऽसृष्टरजस्तमस्काः
यत्परं ईश्वरोऽस्ति अहंतमेवमानवतयापि नृणामेवतयापिपापिनामेवत किंकरः सन्न ईश्वरः सन् सर्वेश्वरः कोऽसावत
यस्मिन्विश्वमोतं प्रोतं वस्त्रोर्ध्वतिर्यक्तंतवः पटं वत यस्यांशेभ्यो विश्वब्रह्मरुद्रेभ्यो ह्यस्य स्थित्यादयो भवंति यस्य च वशे लो
को वर्तते तन्निमित्तमाह यो नामभिर्वाचि निजायां तंत्र्यां दाम्नो नेतयो वध्ना
ति दामभिर्गा बलीवर्दानिव तद्वत्इमे जीवा नामकर्मभिर्निबन्धे बद्धाः यस्मै बलिं वहंति यदधीनाः कर्मकुर्वतीत्यर्थः १३ य
एव न्नोल्लास्त्रि धावछ्येत्यासुरहमिति द्वाभ्यां न सृष्टरजस्तमस्के यैः इति अभिमते चेष्टितं वा न विदुः सृष्टमायाः माय
या सृष्टाः तत स्तस्थ्यान्येनावदेशतिकिं पुनर्वक्तव्यं १५ ॥

तन्मायामोहितत्वान्न जानंतीत्युक्तं स्वविषयत्वाच्च तस्य तत्त्वाह यमिति गोभिरिंद्रियैर्हृदा चित्तेन न विचक्षते न पश्यंति यद्वा वान
सुभिरिति यन्मनो न मनुते इत्यादिश्रुतेः आत्मनां जीवानां आत्मानं द्रष्टारं स्वरूपेण तेषां रूपाणां चक्षुर्यथाकृतयः भूतानि न जानंति तत्तु
परमात्मनो नामरूपादिकं न हि प्रमाणाप्रमाणास्य विषय इति भावः एवंभूतः परमेश्वरोस्तीति सर्वेणाव संबन्धः १६ भवत्येवं
स्वतोन्यः परमेश्वरः ये तु नरस्माभिर्भक्तस्य पापिनो रक्षितवंतः तेके तानाह तस्येति ... तद्रूपगुणाः प्रभावादयः स्वभा
वः भक्तवात्सल्यादिर्येषां ते १७ विष्णोर्भूतानि भृत्याः दुर्दर्शानि द्रष्टुमशक्यानि लिंगानि रूपाणि येषां तानि तद्भक्तिमतः

यं वै न गोभिर्मनसासुभिर्वा हृदा गिरा वासुभृतो विचक्षते आत्मानमंतर्हृदि संतमात्मनां चक्षुर्यथैवाकृतयः
ततः परं १६ तस्यात्मतंत्रस्य हरेरधीशितुः परस्य मायाधिपतेर्महात्मनः प्रायेण दूता इह वै मनोहराश्च
रंति तद्रूपगुणस्वभावाः १७ भूतानि विष्णोः सुरपूजितानि दुर्दर्शलिंगानि महाद्भुतानि रक्षंति तद्भक्तिम
तः परेभ्यो मत्तश्च मर्त्यानथ सर्वतश्च १८ धर्मं तु साक्षाद्भगवत्प्रणीतं न वै विदुर्ऋषयो नापि देवाः न सि
द्धमुख्या असुरा मनुष्याः कुतो नु विद्याधरचारणादयः ॥ स्वयंभूर्नारदः शंभुः कुमारः कपिलो मनुः प्र
ह्लादो जनको भीष्मो बलिर्वैयासकिर्वयं २० द्वादशैते विजानीमो धर्मं भागवतं भटाः गुह्यं विशुद्धं दुर्बो
धं यं ज्ञात्वामृतमश्नुते २१ एतावानेव लोकेस्मिन्पुंसां धर्मः परः स्मृतः भक्तियोगो भगवति तन्नामग्रहणा
दिभिः २२ नामोच्चारणमाहात्म्यं हरेः पश्यत पुत्रकाः अजामिलोपि येनैव मृत्युपाशादमुच्यत २३

विष्णुभक्तान् परेभ्यः शत्रुभ्यः सर्वतः व्याघ्रादिभ्यश्च रक्षंतीति १८ ननु विष्णुभक्ताश्चेत्कथमधर्ममपत्यं पातकत्वेन तत्राह
धर्ममिति ऋषयो भृग्वादयः १९ ननु कोपि चेन्न जानाति तस्य सत्त्वे किं प्रमाणं तत्राह स्वयंभूरिति कुमारः सनत्कुमारः व
यमित्यात्मानमेव बहु मन्यमानो निर्दिशति २० हे भटाः २१ तमेव धर्ममाह एतावानिति २२ न चात्र प्रमाणं वक्तव्यं प्रत्यक्ष
दृष्टत्वादित्याह नामोच्चारणेति येन केवलेन सकृदुच्चारितेन २३ ननु नामाभ्यासेन कथं सर्वपापक्षयः स्यात् श्रुत्या अभ
तया कृच्छ्रादेरपि विधानात् तथा हि सायं प्रातर्गृणन् भक्त्या दुःखग्रामाद्विमुच्यत इति अनुदिनमिदमादरेण स्मरन्निति
श्रवणं कीर्तनं ध्यानं हरेरद्भुतकर्मणः जन्मकर्मगुणानां च तदर्थेऽखिलचेष्टितमित्याद्यसिद्धेश्च प्रत्यगात्मनि ... ते श्रुता
नामानि च यानि तथापि भवति स्मरतां ... निशामिति अतएव तस्मात्संकीर्तनं विष्णोर्जगन्मंगलमंहसां महतामपि कौरव्य विद्धि

कांनिकं निष्कृतमित्यादिना सम्यक्कीर्तनादेव मन्यंते किंच तथा सति किमिति मन्वादयो द्वादशाब्दानि स्मरेयुः त
स्मादिदं मन्तुपमन्नमिव तत्राह एतावतेति भगवतो गुणानां कर्मणां च नाम्नां च सम्यक्कीर्तनं इतियत् एतावता पुं
सामघनिर्हरणाय पापहरणाय मालं यस्त्रलं प्रयोगो नास्ति अलं शब्दो वारणे तथाह अमरसिंहः अलं भूषणपर्या
प्तिशक्तिवारणवाचकमिति इप्रयोगाभावमेवाह अजामिलो महापापी तत्कापि नारायणेति विक्रुश्य उत्तं सम्यक्कीर्त
यित्वा तत्पुत्रं विक्रुश्य न तु हरिं अघवान् अशुचिरपि म्रियमाणोस्वस्थचित्तोपि मुक्तिमवाप न च वाचो निर्हरणमात्रं श्रुतो
नामाभासेनापि सर्वपापत्वयद्भ्यैव तत्रं अत्रहेति श्रद्धादिविषयत्व पापक्षमनात्यार्थं अयुक्तमेव हरेर्गुणवादः
तत्समग्रभावनं इत्यत्र २४ यत एवं तर्हि द्वादशाब्दादिस्मरणमिति तत्राह प्रायेणेति महाजनो मन्वादिः अयं भावः

एतावतालमघनिर्हरणाय पुंसां संकीर्तनं भगवतो गुणकर्मनाम्नां। विक्रुश्य पुत्रमघवान्यदजामिलो
पि नारायणेति म्रियमाण इयाय मुक्तिं २४ प्रायेण वेद तदिदं न महाजनोयं देव्या विमोहितमतिर्बत
माययालं त्रय्यां जडीकृतमतिर्मधुपुष्पितायां वैतानिके महति कर्मणि युज्यमानः २५ एवं विमृश्य
सुधियो भगवत्यनंते सर्वात्मना विदधते खलु भावयोगं ते मे न दंडमर्हंत्यथ यद्यमीषां स्यात्पातकं तद
पि हंत्युरुगायवादः २६ ते देवसिद्धपरिगीतपवित्रगाथा ये साधवः समदृशो भगवत्प्रपन्नाः तान्नोप
सीदत हरेर्गदयाभिगुप्तान्नैषां वयं न च वयः प्रभवाम दंडे २७

यथामृतसंजीवनौषधीमजानंतो वैद्या रोगनिर्हरणाय त्रिकटुकनिंबादीनि स्मरंति तत्राप्यंतर्भूतो अश्रमपद्वादशाब्द
निरेकणाय महाजनोऽतिगुह्यमिदमजानन् द्वादशाब्दिकं स्मरतीति किंच मायया देव्या अलं मोहितमतिर्यतोऽतः मधुम
धुरया यावद्भिपत्र अप्यता या पुष्पस्थानीयैरर्थवादैर्मनोहरायां त्रय्यां जडीकृता अभिनिविष्टा मतिर्यस्य अतो महति
त्यवकर्मणि अग्न्युत्पाद्यमानो नाल्पे प्रवर्तते तथाच महिषाकृतस्यलोकस्य महति मे यादी अश्रद्धा अल्पे चाश्रुत्ज्ञानस्मा दृ
स्यश्राहकोनास्तीति तेनोक्तं यद्वा स्वाधीनः सिंहश्चेत्यता वतावभ्रुसृगालादिनिवारणाय तं यथा न प्रयुंजते तथाति
तत्त्वात्पापस्य न तन्निरसनाय परमं मंगलं हरेर्नाम स्मरेति यद्वा नाममाहात्म्यज्ञाने सर्वमुक्तिप्रसंगादित्यपादि
कृश्रन्यायविस्तरभयात्तं नातिप्रपञ्चते २५ भावयोगं भक्तियोगं अमीषां पातकं न स्यादेव यदि स्यात्तदुरुगायस्य वादः की
र्तनं २६ तदेवं यमेन वर्णितानि गायत्र्या नव भागस्तन इति भगवत्प्रपन्नाः तेदेवैः सिद्धैश्च परिगीता पवित्रगाथा यासां

श्रीः
भा॰ ष॰
टी॰
९

केनचिद्देहार्थमानेया इत्यत्राह ताननिति द्वाभ्यां असतः दुष्टान् तानेवाह मुकुंदपादारविंदयोर्यो मकरंदस्तद्रूपो रसस्तस्मा
त् विमुखान् कथंभूतात् निष्किंचनैः रसज्ञैर्जुष्टात् तेषां तापकमाह निरयवर्त्मनि स्वधर्मश्रेण्यां गृहे बद्धा तृष्णा येषां ता
न् २८ किंच जिह्वेत्यादि यद्येषां जिह्वेत्यादि अकृतविष्णुकृत्यं अभगवत्सेवनं यैः २९ भगवंतं क्षमापयति तदिति
प्रसंभावः नः स्वपुरुषैर्यदसदीयत्वेनाश्रितैः नीयैरेव पुरुषैर्यद्यस्मात् असत् अन्याय्यं कृतं ततः स्मात् स्वयमेव क्षम्यतां
महतां स्वानां स्वीयानां नः न विदुषां अज्ञानां अतो गरीयसि क्षमितास्मि नु क्षान्तिर्युक्तैवमहद इति पाठे स्वीयानां माहात्म्यमविदु
षां नः क्षमां करोतु इत्यर्थः ३० तस्मादित्यादि मुकौलिकैः जगतोपि मंगलरूपं ३१ एकांतिकमेवाह एतदेवानाहेति

ताननयध्वमसतो विमुखान् मुकुंदपादारविंदमकरंदरसादजस्रं निष्किंचनैः परमहंसकुलैरसंगैर्जु
ष्टाद्गृहे निरयवर्त्मनि बद्धतृष्णान् २८ जिह्वा न वक्ति भगवद्गुणनामधेयं चेतश्च न स्मरति तच्चरणारविं
दं कृष्णाय नो नमति यच्छिर एकदापि ताननयध्वमसतोऽकृतविष्णुकृत्यान् २९ तत्क्षम्यतां स भग
वान् पुरुषः पुराणो नारायणः स्वपुरुषैर्यदसत्कृतं नः स्वानामहो न विदुषां रचितांजलीनां क्षांतिर्गरीय
सि नमः पुरुषाय भूम्ने ३० तस्मात्संकीर्तनं विष्णोर्जगन्मंगलमंहसां महतामपि कौरव्य विद्ध्यैकांतिक
निष्कृतिं ३१ शृण्वतां गृणतां वीर्याण्युद्दामानि हरेर्मुहुः यथा सुजातया भक्त्या शुद्ध्येन्नात्मा व्रतादिभिः
३२ कृष्णांघ्रिपद्ममधुलिण्न पुनर्विसृष्टमायागुणेषु रमते वृजिनावहेषु अन्यस्तु कामहत आत्मरजः प्र
मार्ष्टुमीहेत कर्म यत एव रजः पुनः स्यात् ३३ इत्थं स्वभर्तृगदितं भगवन्महित्वं संस्मृत्य विस्मितधियो यम
किंकरास्ते नैवाच्युताश्रयजनं प्रतिशंकमाना द्रष्टुं च बिभ्यति ततः प्रभृति स्म राजन् ३४ इतिहासमिमं गु
ह्यं भगवान् कुंभसंभवः कथयामास मलय आसीनो हरिमर्चयन् ३५ इति गव षष्ठे तीयो यः ३

वनादिभिः तथा न शुद्ध्येत् ३२ एतदुपपादयति कृष्णांघ्रिपद्मयोर्मधु लेढि आस्वादयतीति मधुलिट् न तु केनचिद्वि
सृष्टा ये मायागुणा विषयाः तेषु पुनर्नैव रमते अन्यस्तु तन्मधास्वादरहितः अतएव कामाभिभूतः सन् आत्मनो रजः पा
पं प्रमार्ष्टुमपि कर्मैव प्रायश्चित्तरूपमीहेत यतः कर्मणः पुनरपि रजः पापं स्यादेव कुंजरशौचवत् सम्यक्शोधकत्वाभा
वात् ३३ नैव विस्मितधियो यमभृत्याः किं तु सत्यमुक्तमित्येवमनिरतताः प्रभृति मशोकमानाः अस्माभिर्न यमदूत्यादिः तिशं
कं स्वदृष्ट्वा नः ते द्रष्टुमपि बिभ्यति स्म पाठांतरे नैव विस्मितधियो जाताः ते च तत प्रभृति बिभ्यति स्मेत्यर्थः ३४ कुंभसंभवो

गस्त्यो मलये पर्वते आसीनो व्याख्याता हरिमर्चयन् पुनः पुनः विस्मितार्थं
हरेः पादौ स्पृशन्नित्यर्थः ३५ भा ष टी तीध्यायः ३
८

व्रतचर्यादिविभिर्विष्णुव्रतमन्त्रयुक्तया प्रचेतःसुतदक्षस्य वंशस्तावन्निरूप्यते चतुर्थे तत्प्रजासृष्ट्यै दक्षो नारायणं
हरेः तपसा हंसगुह्याख्यस्तोत्रेणाथ निरूप्यते प्रसक्तानुप्रसक्तेन स्वायंभुवसुतान्वये नामप्रभावमाकर्ण्य वंशाख्या
नं तु बुभुत्सते देवासुरेति द्वाभ्यां सामासिकः संक्षिप्तः यः प्रोक्तः तृतीयस्कंधे १ व्यासं विस्तारं ते त्वत्तः यया शक्त्याया
यामसर्जतां शक्तिं तत्प्रकारं च ज्ञातुमिच्छामि अनुसर्गमनुष्ठानं सर्गं २ ३ दक्षादिरूपेण ससर्जेति वक्तुं दक्षजन्मप्र
कारमाह यदेति प्राचीनबर्हिषः पुत्रा यदा समुद्रमध्यादुन्मग्ना निर्गताः तदा गां पृथ्वीं द्रुमैर्वृतां ददृशुः नारदोपदेश

राजोवाच देवासुरनृणां सर्गो नागानां मृगपक्षिणां सामासिकस्त्वया प्रोक्तो यस्तु स्वायंभुवेंतरे १
तस्यैव व्यासमिच्छामि ज्ञातुं ते भगवन् यथा अनुसर्गं यया शक्त्या ससर्ज भगवान्परः २ सूत उवाच
इति संप्रश्नमाकर्ण्य राजर्षेर्बादरायणिः प्रतिनंद्य महायोगी जगाद मुनिसत्तमाः ३ शुक उवाच यदा
प्रचेतसः पुत्रा दश प्राचीनबर्हिषः अंतःसमुद्रादुन्मग्ना ददृशुर्गां द्रुमैर्वृतां ४ द्रुमेभ्यः क्रुध्यमानास्ते त
पोदीपितमन्यवः मुखतो वायुमग्निं च ससृजुस्तद्दिधक्षया ५ ताभ्यां निर्दह्यमानांस्तानुपलभ्य कु
रूद्वह राजोवाच महान्सोमो मन्युं प्रशमयन्निव ६ न द्रुमेभ्यो महाभागा दीनेभ्यो द्रोग्धुमर्हथ विवर्द्ध
यिषवो यूयं प्रजानां पतयः स्मृताः ७ अहो प्रजापतिपतिर्भगवान्हरिरव्ययः वनस्पतीनोषधीश्च सस
र्जोर्जमिषं विभुः ८ अन्नं चराणामचरा ह्यपदः पादचारिणां अहस्ता हस्तयुक्तानां द्विपदां च चतुष्पदः
९ यूयं च पित्रान्वादिष्टा देवदेवेन चानघाः प्रजासर्गाय हि कथं वृक्षान्निर्दग्धुमर्हथ १० आतिष्ठत स
तां मार्गं कोपं यच्छत दीपितम् पित्रा पितामहेनापि जुष्टं वः प्रपितामहाः ११

तः प्राचीनबर्हिषो निवृत्ता प्रजाके मतिकृष्याद्यभावात् ४ तपसा दीपितो मन्युर्येषां ते तेषां द्रुमाणां दग्धुमिच्छया ५
ताभ्यां वाय्वग्निभ्यां दह्यमानांस्तान् द्रुमान् वनस्पतीनां राजा सोम उवाच ६ न द्रुमेभ्य इति नवभिः हे महाभागाः विशेषे
ण वर्द्धयितुमिच्छवः ७ प्रजापतीनां पतिः इत्यभोज्य वृक्षा नोचितं इत्याह अहो इति त्रिभिः ऊर्जं भक्ष्यं इषमन्नं ८ ९ १०
अन्नं आतिष्ठत आश्रयत सतां मार्गं मत्पद्धर्मं पित्रादिभिर्जुष्टं ११ प्रजानां प्रजापतिरेव बन्धुः अतस्तज्जीविकानाशो
न कर्तव्य इति दृष्टान्तपंचकेनाह तोकानां बालानां मातापितरौ दृग्ज्ञानां ज्ञानदो गुरुपक्ष्मवत्सुहृत १२

श्री॰
भा॰ष॰
टी॰
२०

ईश्वराधिष्ठानत्वाद्भूतद्रोहो न युक्त इत्याह अंतर्देहेष्विति वः युष्माभिः १३ आकाशाद्देहे समुत्पतितं आकस्मिका-
मित्यर्थः आत्मविचारेण यो नियच्छेत् १४ खिलानां शेषाणां वः युष्माकं च शिवमस्तु इत्युक्त्वा लक्षणार्थं तद्दीयो कन्यां द-
दाति वार्क्षी वृक्षैः पालिता १५ आमंत्र्य सांत्वयित्वा आप्सरसीं प्रम्लोचायाः सुतां कण्डोर्मुनेः १६ १७ दुहितृव-
त्सल इति तस्य कन्याविवाहे पवेत्युक्ते ममवहितः १८ प्रजापतिर्दक्षः १९ अबृंहितं असंवृद्धं विन्ध्यस्य पादान् सन्निहिता-

लोकानां पितरो बन्धुर्दृशः पक्ष्म स्त्रियाः पतिः पतिः प्रजानां भिक्षूणां गृह्यज्ञानां बुधः सुहृत् १२ अंतर्दे-
हेषु भूतानामात्मास्ते हरिरीश्वरः सर्वं तद्धिष्ण्यमीक्षध्वमेवं वस्तोषितो ह्यसौ १३ यः समुत्पतितं देह-
आकाशान्मन्युमुल्बणं आत्मजिज्ञासया यच्छेत्स गुणानतिवर्तते १४ अलं दग्धैर्द्रुमैर्दीनैः खिलानां
शिवमस्तु वः वार्क्षी ह्येषा वरा कन्या पत्नीत्वे प्रतिगृह्यतां १५ इत्यामंत्र्य वरारोहां कन्यामाप्सरसीं नृप सो-
मो राजा ययौ दत्त्वा ते धर्मेणोपयेमिरे १६ तेभ्यस्तस्यां समभवद्दक्षः प्राचेतसः किल यस्य प्रजाविसर्गेण
लोका आपूरितास्त्रयः १७ यथा ससर्ज भूतानि दक्षो दुहितृवत्सलः रेतसा मनसा चैव तन्ममावहि-
तः शृणु १८ मनसैवासृजत्पूर्वं प्रजापतिरिमाः प्रजाः देवासुरमनुष्यादीन्नभःस्थलजलौकसः १९
तमबृंहितमालोक्य प्रजासर्गं प्रजापतिः विन्ध्यपादानुपव्रज्य सोऽचरद्दुष्करं तपः २० तत्राघमर्षणं
नाम तीर्थं पापहरं परं उपस्पृश्यानुसवनं तपसातोषयद्धरिं २१ अस्तौषीद्धंसगुह्येन भगवंतमधोक्ष-
जं तुभ्यं तदभिधास्यामि कस्यातुष्यद्यतो हरिः २२ प्रजापतिरुवाच नमः परायावितथानुभूतये गुण-
त्रयाभासनिमित्तबन्धवे अदृष्टधाम्ने गुणतत्त्वबुद्धिभिर्निवृत्तमानाय दधे स्वयंभुवे २३ न यस्य सख्यं पु-

पर्वतान् २० २१ हंसगुह्याख्येन स्तोत्रेण कस्य दक्षस्य २२ पराय सर्वोत्तमाय सर्वोद्भवे नमस्करोमि परमेश्वरः अवि-
तथा सत्या अनुभूतिः चिच्छक्तिर्यस्य यतो गुणत्रयस्याभासो जीवो निमित्तं माया च तयोर्बन्धवे नियंत्रे एवमपि गुणेषु तत्त्वबुद्धिर्ये-
षां तैर्जीवैरदृष्टं धाम स्वरूपं यस्य तस्मै हेतुः निवृत्तमानं यस्मात् पाठान्तरे निवृत्तमानमेवावधिर्यस्मात् तर्हि कथं तस्य
सिद्धिः स्वतस्त्वाह स्वयंभुवे स्वप्रकाशाय २३ अदृष्टधामत्वं दर्शयन्नाह नेति द्वाभ्यां पुरुषः सखा जीवः अस्मिन्देहे यस्य स-
खिभूत एव सन् सख्युर्यस्य सख्यं करणप्रवर्तकत्वादिकं नावैति न जानाति तस्मै अतः ... दृष्टः प्रपञ्चदृष्टः नाहिर-
ण्यद्रष्टा भवतीति प्रथमान्तपाठे ... स्वगुणो विषयो गुणानां विषयिणामिन्द्रियादेः सख्यप्रकाशकत्वं यथा न वेत्ति तद्वत् २४

२०

नवेदगुणांश्चज्ञस्तदा तज्ज्ञो जानाति जीवस्तु चेतनः किमिति न जानाति अत आह देह इति देहः असवः प्राणाः अक्षाणीन्द्रियाणि
मनवश्चान्तःकरणानि भूतानि च मात्राश्च तन्मात्राणि आत्मानं स्वस्वरूपं तद्व्यतिरिक्तमन्यमिन्द्रियवर्गं तद्देवतावर्गं च न
विदुः पुमान् जीवस्तु सर्वं मत्तत्त्वं वेद गुणांश्च तन्मूलभूतान् वेदनं तथापि सन् यं सर्वज्ञं तं न वेद तम् अनंतमीडे स्तौमि २५ अथ दृष्ट
धामन समुक्तास्वप्रकाशत्वमाह यदा मनस उपरामः समाधिः न तु सुषुप्तादिविलयः न नाशस्तस्य मयो विविक्षेपः तस्य
हनामरूपरूपस्य वेदनं तत्र यातस्य उपरमे हेतुः दृष्टं दर्शनं स्मृतिश्च तयोः संप्रमोषात् नाशात् तदा यः केवलेन स्वरूपमात्रे
णेन प्रतीयते तस्मै हंसाय शुद्धाय शुचि विशुद्धं मनः सद्म प्रतीतिस्थानं यस्य तस्मै नमः २६ एवंभूतः केषां प्रतीयत इत्यपे

देहोऽसवोऽक्षा मनवो भूतमात्रा नात्मानमन्यं च विदुः परं यत् सर्वं पुमान्वेद गुणांश्च तज्ज्ञो न वेद सर्वज्ञमनंत
मीडे २५ यदोपरामो मनसो नामरूपरूपस्य दृष्टस्मृतिसंप्रमोषात् य ईयते केवलया स्वसंस्थया हंसाय
तस्मै शुचिसद्मने नमः मनीषिणोऽन्तर्हृदि संनिवेशितं स्वशक्तिभिर्नवभिश्च त्रिवृद्भिः वह्निं यथा दारु
णि पांचदश्यं मनीषया निष्कर्षंति गूढं २७ स वै ममाशेषविशेषमायानिषेधनिर्वाणसुखानुभूतिः स स
र्वनामा स च विश्वरूपः प्रसीदतामनिरुक्तात्मशक्तिः २८

क्षायामाह मनीषिण इति द्वाभ्यां विवेकिनो यं निष्कर्षंति विविच्य ध्यायंति स निर्वाणसुखानुभूतिर्मम प्रसीदतामि
ति द्वयोरन्वयः एवं निष्कर्षितो प्रतीयत इति भावः किमिति निष्कर्षंति स्वशक्तिभिः सूक्ष्मप्रकाशमानं कर्मभिर्नवभि
र्नवभिः पुनश्च त्रिवृद्भिः त्रिगुणाभिः सप्तविंशत्युपाधिभिः गूढं अदृष्टो विशेषान् निष्कर्षंतीत्यर्थः यद्वा नवभिः प्रकृतिपुरु
षमहदहंकारपंचतन्मात्ररूपाभिः त्रिवृद्भिः त्रिगुणात्मिकाभिः चकारात् षोडशविकारैश्च एवमभिस्तु कथंभूतं निष्कर्षंति
मनीषया बुद्ध्या अंतर्हृदि संनिवेशितं निगूढीकृतं पंचदश्यं पंचदश सामिधेनीमंत्रैः प्रकाश्यं अलौकिकं वह्निमिव अहंकारा
त्स्यादात्मनोऽन्यं परमात्मानं निष्कर्षंतीत्यर्थः २७ अशेषा विशेषा यस्याः तस्या मायायाः निषेधेन निर्वाणसुखेनानुभ
तिर्यस्य स प्रसन्नः निषेधासंभवात् प्रसन्नं किमाह स एव सर्वनामा स एव विश्वरूपः इति न तु पतरं त्यजतस्तथा भावा
द्विशेषः संभवतीत्याह अनिरुक्ता अशेषा आत्मनि शक्तिर्माया यस्य सः २८

नत्वयदिकेवलयासमस्थयाश्वनीयतेनाहिंसर्वनामतंवानुमपन्नंवागायगोचरत्वादित्यशंक्यसर्वैर्नामभिर्वाच्यत्व
स्यतादिदंशंच्यवतस्यस्वरूपंवस्तुतोमाभूत्ततथापिमायायाद्दतइतिश्लोकत्रयेणोपपादयन्नमस्करोतियद्यदि॰
तियद्यद्वचसानिरुक्तंनाभिहितंधियानिरूपितंच्यवसितंश्रुतिभिर्वाइंद्रियैर्निरूपितंगृहीतंउतापिमनसापिनिरू
पितंसंकल्पितंयस्यस्वप्रकाशंवतस्यतत्स्वरूपंमाभूत्स्वरूपत्वाभावेहेतु:हियस्मात्तद्गुणानामेवरूपंयाठांतरेगु
णार्वहितेमनगुणव्यतिरिक्त:यतोगुणानामपायविसर्गाभ्यांप्रलयोत्पत्तिभ्यांलक्ष्यतइतितथाचेतनाधिष्ठानंविना
तयोरसंभवात्तद्वायस्यस्वरूपंमाभूत्प्रभवतितस्मैनमइतितृतीयेनान्वय: ११ तदेवंवस्तुतोगुणासहूपत्वाभावसं
गीकृत्यअनिरुक्तात्मशक्तिरित्यनेनद्योतितेमायायासर्ववाच्यत्वेनविश्वरूपत्वमाह यस्मिन्नधिकरणेयतोपादानत्वेन

यद्यन्निरुक्तंवचसानिरूपितंधियादिभिर्वामनसावोतयस्य माभूत्स्वरूपंगुणरूपंहितंसवैगुणापाय
विसर्गलक्षण: १२ यस्मिन्यतोयेनचयस्ययस्मैयद्योयथाकुरुतेकार्यतेच परावरेषांपरमंप्राक्प्रसि
द्धंतद्ब्रह्मतद्धेतुरनन्यदेकं १· यच्छक्तयोवदतांवादिनांवैविवादसंवादभुवोभवंति कुर्वतिचैषांमुहुरा
त्ममोहंतस्मैनमोनंतगुणायभूम्ने २। ॥

करणेनयस्यसंवन्धियस्मैसंप्रदानायपदीप्सिततमंयःकर्ताकुरुतेस्तितैःकार्यतेवान्येनप्रयोज्यकर्तानद्ब्रह्मेतिवि
न्यकंसवन्धः अत्रवसमभिःपद्वैःसमस्तविभक्त्यर्थोदर्शिताः यथेतिचक्रियाकारकसंबन्धप्रकारवाचिनामव्य
यानामर्थोः कुरुतेकार्यतेचेतिसाध्यसाध्यंक्रियान्वयश्चसर्वेषांदर्शिता:चशब्देनभावकर्मादिविहितप्रत्ययार्थो:
संगृहीताःतद्ब्रह्मेवेतिकुतस्तत्राह तद्धेतुःयेषांकारणांततत्कृतःसर्वेभ्यःप्राक्प्रसिद्धंमनुब्रह्मादयःतद्धेतवःश्रूयं
तेअपरावरेषांयंमतंतत्कपंब्रह्मेवतद्धेतुःतत्राहपरेषांअवरेषांचहेतुर्नापरमंकारणंनतुसर्वकारणत्वेनस्यांकिंनामस
हकारिभवेत्तदानीमन्यस्याभावात्तस्यनिरपेक्षमेवतत्कारणमित्याह अनन्यद्विजातीयशून्यंएकंसजातीयशून्यंचतत
स्मैनमइत्यनन्तरेणान्वयः ३· ननुवंब्रह्मचेद्विश्वस्यहेतुःतर्हिनकदाचिदनीदृशंजगदितिवदतांमीमांसकाःकुतोशवि
वदतेनस्वान्यस्वभाववादिनःसंवदंतेतेचाहितत्तविद्विवोधितात्रपिकुत:पुनःपुनःमुह्यंतितत्राहयस्यमायाविद्यया:शक्तयोविवादस्य

ननु किं तद्ब्रह्म यस्य प्राप्त्युपायो विवादास्पदीभूतो भवतीति तत्राह अस्तीति योग उपासनाशास्त्रं तत्र हि विग्रहोपासनायां
पाणिपादादिकमस्तीत्युपास्यत्वेन विधीयते नास्तीति सांख्येन ज्ञानशास्त्रेण अपाणिपादः अवक्त्रमश्रोत्रमिति च पा
णिपादादि नास्तीति निषिध्यते तयोर्योगसांख्ययोर्यत्किंचित्सममनुवर्तमानमवेक्षितं प्रतीतं तत्तद्ब्रह्म विवादस्याविवा
दास्पदं चेत्यर्थः विवादं स्फुटयति भिन्नावस्तिनास्तीत्येवंभूतौ विरुद्धौ धर्मौ ययोः तयोः भिन्नविषयत्वे विरोधो न स्यादि
त्येकस्थयोरिति एकविषययोः अतः वस्तुनिष्ठयोः पादादिविधिप्रतिषेधयोः एकवस्तुनिष्ठत्वात् सम्मत्वे हेतुः परं हि
यतो विधिप्रतिषेधयोर्विषयस्तयोः पादादिविषयत्वात् न हि तयोरविषयस्य सद्भावे किं प्रमाणं तत्राह अनुकूलं

अस्तीति नास्तीति च वस्तुनिष्ठयोरेकस्थयोर्भिन्नविरुद्धधर्मयोः अवेक्षितं किंचन योगसांख्ययोः समं परं
ह्यनुकूलं बृहत्तत् ३२ योनुग्रहार्थं भजतां पादमूलमनामरूपो भगवाननंतः नामानि रूपाणि च जन्मक
र्मभिर्भेजे स मह्यं परमः प्रसीदतु ३३ यः प्राकृतैर्ज्ञानपथैर्जनानां यथाशयं देहगतो विभाति यथानिलः
पार्थिवमाश्रितो गुणं स ईश्वरो मे कुरुतान्मनोरथं ३४ शुक उवाच इति स्तुतः संस्तुवतः स तस्मिन्नघम
र्षणे आविरासीत्कुरुश्रेष्ठ भगवान्भक्तवत्सलः ३५

अधिष्ठानं विना पादादिकल्पनायोगात्तदवधिं विना तन्निषेधायोगाच्च तयोरुभयपादकत्वेन सिद्धमित्यर्थः तस्मै न
म इति शेषः स्यादनुषंगः ३२ ननूदासीनस्य समस्य नमस्कारैः को लाभस्तत्राह य इति पादमूलं भजतामनुग्रहार्थं
प्राकृतनामरूपरहितोपि जन्मभिरवतारैर्विशुद्धोर्जितसत्त्वानि रूपाणि कर्मभिः नामानि च यो भेजे तत्र कृतः भगवा
नचिन्त्यैश्वर्यः मम सोयं प्रसीदतु ३३ ननु बाह्याः सकामा मार्गाः प्राद्यादीन् प्रार्थयंते तेन तानु विहाय किमिति भगवंतमे
व प्रार्थयसे तत्राह प्राकृतैरर्वाचीनैर्ज्ञानपथैरुपासनामार्गैर्यथाशयं तत्तदुपासनानुसारेण यो देहगतो यामीनतत्तद्दे
वताद्रूपेण विविधो भाति यथा वायुः पार्थिवं च सकादिगन्धभेदमाश्रित्य नानागन्धवान् विभाति तेषां गुणं स पुष्परक्तादिकमा
श्रित्य नानारूपवान् प्रतीयते तद्वत् स एव तत्तद्देवतारूपेण फलदातृत्वात् स ईश्वर एव मम मनोरथं सत्यं करोतु किं मे
देवतांतरैरित्यर्थः तदुक्तं गीतासु यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति तस्य तस्याचलां श्रद्धां तामेव विद
धाम्यहं स तया श्रद्धया युक्तः तस्याराधनमीहते लभते च ततः कामान्मयैव विहितान्हितानिति ये यथा मां प्रपद्यंते तां

तेवर्णयति सार्द्धैस्त्रिभिः सुपर्णास्यांसो स्कंधे कृतौ पादौ येन प्रलंबा अष्टौ महांतो भुजा यस्य चक्राद्यष्टायुधधरः ३६
प्रसन्ने वदनेईक्षणे च यस्य वनमालया निवीतं कंठादिपादांतं व्याप्तमंगं यस्य लसंतौ श्रीवत्सकौस्तुभौ यस्य ३७ महां
ति किरीटकटकानि यस्य स्फुरंती मकरकुंडले यस्य कांच्यादिभिर्विभूषितः वलयमत्र पादभूषणं कटकश्चैव कटकस्या
केवलात् ३८ त्रैलोक्यमोहनं श्रीपुरुषोत्तमाख्यं सुरयूथपैर्लोकपालैः ३९ ४० आपूरितानि मनोद्वाराणींद्रिया
णि तैर्यथा ह्रदिन्यो नद्यो निर्झरैरापूर्यंते तेन प्रेमानंदाश्रुपूर्णेन नाड्यादिकं तत्वागादीनां न किंचित्वक्तुं शक्तोऽभवदित्य

कृतपादः सुपर्णांसे प्रलंबाष्टमहाभुजः चक्रशंखासिचर्मेषुधनुःपाशगदाधरः ३६ पीतवासा घनश्या
मः प्रसन्नवदनेक्षणः वनमालानिवीतांगो लसच्छ्रीवत्सकौस्तुभः ३७ महाकिरीटकटकः स्फुरन्मकरकुं
डलः कांच्यंगुलीयवलयनूपुरांगदभूषितः ३८ त्रैलोक्यमोहनं रूपं बिभ्रत्त्रिभुवनेश्वरः वृतो नारदनं
दाद्यैः पार्षदैः सुरयूथपैः ३९ स्तूयमानोऽनुगायद्भिः सिद्धगंधर्वचारणैः रूपं तन्महदाश्चर्यं विचक्ष्याग
तसाध्वसः ४० ननाम दंडवद्भूमौ प्रहृष्टात्मा प्रजापतिः न किंचनोदीरयितुमशकत्तीव्रया मुदा ४१
आपूरितमनोद्वारैर्ह्रदिन्य इव निर्झरैः तं तथावनतं भक्तं प्रजाकामं प्रजापतिं चित्तज्ञः सर्वभूतानामिद
माह जनार्दनः ४२ श्रीभगवानुवाच प्राचेतस महाभाग संसिद्धस्तपसा भवान् यच्छ्रद्धया मत्परया म
यि भावं परं गतः ४३ प्रीतोऽहं ते प्रजानाथ यत्तेऽस्योद्बृंहणं तपः ममैष कामो भूतानां यद्भूयासुर्विभूतयः
४४ ब्रह्मा भवो भवंतश्च मनवो विबुधेश्वराः विभूतयो मम ह्येता भूतानां भूतिहेतवः ४५

र्थः यद्यप्यसौ नावोचत्तथापि चित्तज्ञः इदं वक्ष्यमाणमाह ४२ भावं भक्तिं गतः प्राप्तः ४३ यत् यतस्ते तपः अस्य वि
श्वस्य उद्बृंहणं वृद्धिकरं अतस्ते अहं प्रीतः मत्तपसा लोकसमृद्ध्यर्थं तेन त्वत्प्रीतेः किं कारणं तत्राह ममैतद्भूतानां विभूत
यः समृद्धयो भूयासुरिति यत् एष एव मम कामः अतो मत्कामसंपूरणादेवाहं प्रीतोऽस्मीत्यर्थः ४४ भूतिविस्तारस्य
यत्नस्तु त्वं चेति त एव इत्याह ब्रह्मेति भवंतः प्रजा
पतयः भूतेरुद्भवस्य हेतवः ४५

विश्वसृड्यद्यर्थेन वक्ष्यमाणं प्रीत इत्युक्तं तद्देवत पः स्तवनप्रसंगात्तदन्यान्यपि लोकहृदि करणि विद्यादीनि स्तौति तपः य
मनियमादि सहितं ध्यानं मे हृदयं नियमसांगमेव जपः साध्यानं तनोतीति तनुर्देहः क्रिया ध्यानादि विषयः प्रेव्यापारो
भावना शब्देन वाच्यस्तेन न हि ध्यानादिकमाक्रियत इत्याकृतिः जाताः सुनिष्पन्नाः क्रतवोंगानि शिरो बाहूदरपादग्रीवाः
ग्रीवाः उपसंदत्तुत सा प्रान्त्यभागा वित्यादि श्रुतेः धर्मः कृताद्यपूर्वं आत्मा मनः हृदयाश्रयत्वात् सुराय तत्भुजस्तपव
श्चासवः प्राणाः सततं चलनीयत्वात् ४६ तपसः संतानशुद्धिहेतुत्वं दर्शयितुं हेतोर्यत्पूतीयोतं प्रमिति हास्मा हे त्वतीर्भः प्र
ह मेवेति वसन्तेन त्वयाहृतिः प्रासमेवेति क्रियांतरव्याहृतिं प्रतरं ग्राहकं बाह्यं ग्राह्यं संतानमात्रं चैतन्यमात्रं श्चाव्यक्तो मिधि
यह्णाज्ञि मरनमिव्यक्तं प्रतपव प्रसुप्तमिव विश्वतः सर्वत्र ४७ गुणतो मायातः गुणमयो विग्रहो ब्रह्मांडं ततः वदेव ब्रह्म

तपो मे हृदयं ब्रह्मंस्तनुर्विद्या क्रियाकृतिः अंगानि क्रतवो जाता धर्म आत्मासवः सुराः ४६ अहमेवास
मेवाग्रे नान्यत्किंचांतरं बहिः संज्ञानमात्रमव्यक्तं प्रसुप्तमिव विश्वतः ४७ मय्यनंतगुणेऽनंते गुणतो गुण
विग्रहः यदासीत्तत एवाद्यः स्वयंभूः समभूदजः ४८ स वै यदा महादेवो मम वीर्योपबृंहितः मेने खि
लमिवात्मानमुद्यतः स्वर्गकर्मणि ४९ अथ मेऽभिहितो देवस्तपोऽतप्यत दारुणं नव विश्वसृजो युष्मान्ये
नादावसृजद्विभुः ५० एषा पंचजनस्यांग दुहिता वै प्रजापतेः असिक्नी नाम पत्नीत्वे प्रजेश प्रतिगृह्यतां
५१ मिथुनव्यवायधर्मस्त्वं प्रजासर्गमिमं पुनः मिथुनव्यवायधर्मिण्यां भूरिशो भावयिष्यसि ५२ त्वत्तो
ऽधस्तात्प्रजाः सर्वा मिथुनीभूय मायया मदीयया भविष्यंति हरिष्यंति च मे बलिं ५३ शुक उवाच इत्युक्त्वा
मिषतस्तस्य भगवान्विश्वभावनः स्वप्नोपलब्धार्थ इव तत्रैवांतर्दधे हरिः ५४ इति भाग तेष चत ४

प्रयोनिजः ४८ खिलमसमर्थमिव ४९ मम यातपउपेत्यभिहितः सन् येन तपसा ५० संततिं च युष्मायम्बाह ए
षेति अंग हे दक्ष पंचजनाख्यस्य प्रजापतेः ५१ मिथुनस्य योव्यवायो रतिः स एव धर्मो यस्य स त्वं तथाभूतायां तस्यां
५२ मायया निमित्तभूतया स्त्रिया सह मिथुनीभूय भविष्यंति पुत्रादिरूपेणोत्पत्स्यंते ५३ ५४ इति श्रीभा ष्ठे पि
का च स्क धेचत ध्यायः ४

श्रीः भा॰ ष॰ टी॰ ६

पंचमे नारदेनाथ वाचः कूटैः सुतनाशिनात् सुतानाकर्ण्य दक्षोमुं शशापेति निरूप्यते १ अपृथग्धर्मशीलाः एका
वारस्वभावाः २ तत्र प्रतीच्यां दिशि सिन्धोर्नद्याः समुद्रस्य च यत्र संगमः तत्र स्थाने नारायणसरो नाम तीर्थं प्र
सिद्धमित्यन्वयः सुमहत् अतिविस्तीर्णं विनिर्धूतो मलो रागादिर्यस्मात् स आशयो येषां ४ तान् सृष्ट्यर्थं ध्यानपि
त्रादेशनाज्ञया नियंत्रिताः प्रजाविवृद्धये यत्नान् युक्तान् ददर्श ५ अहो मोक्षमार्गाधिकारिणः सन्तोपि प्रवृत्तिनिष्ठैः कर्मभिः
नष्टा भविष्यन्तीति कृपया तान् निःश्रेयसार्थं तत्त्वं कूटपदैः शनैः स्मरन् तदाह उवाचेति वदन्नभिः पालकाः सन्तोपि बालिशा अज्ञाः एव
कथं प्रजाः स्रक्ष्यथ अन्तम् अविदित्वा बालका इति पाठे बालिशा बत हन्त एकमेव पुरुषो यत्र तद्राष्ट्रमदृष्टं त्वत्प्रसंगः वि

शुक उवाच तस्यां स पांचजन्यां वै विष्णुमायोपबृंहितः हर्यश्वसंज्ञानयुतं पुत्रानजनयद्विभुः १ अपृ
थग्धर्मशीलास्ते सर्वे दाक्षायणा नृप पित्रा प्रोक्ताः प्रजासर्गे प्रतीचीं प्रययुर्दिशं २ तत्र नारायणसरस्ती
र्थं सिन्धुसमुद्रयोः संगमो यत्र सुमहत् मुनिसिद्धनिषेवितं ३ तदुपस्पर्शनादेव विनिर्धूतमलाश
याः धर्मे पारमहंस्ये च प्रोत्पन्नमतयोप्युत ४ तेपिरे तप एवोग्रं पित्रादेशेन यंत्रिताः प्रजाविवृद्धये यत्
तान्देवर्षिः तान्ददर्श ह ५ तथैकपुरुषराष्ट्रं बिलं चादृष्टनिर्गमं बहुरूपां स्त्रियं चापि पुमांसं पुंश्चली
पतिं ७ नदीमुभयतो वाहां पंचपंचाद्भुतं गृहं क्वचिद्धंसं चित्रकथं क्षौरपव्यं स्वयंभ्रमि ८ कथं स्वपितुरा
देशमविद्वांसो विपश्चितः अनुरूपमविज्ञाय अहो सर्गं करिष्यथ ९ शुक उवाच तन्निशम्याथ हर्यश्वा औत्प
त्तिकमनीषया वाचः कूटं तु देवर्षेः स्वयं विमम्रशुर्धिया भूः क्षेत्रं जीवसंज्ञं यदनादि निजबन्धनं अदृ

तेवेत्यादि हितोपतानां प्रतिज्ञाय कथं सर्गं करिष्यथेति तत्रतीयेनान्वयः ७ पंचपंचाद्भुतं पंचविंशतेरद्भुतं गृहं तोरप
ष्ट्वैवं स्वयं भिः वज्रैश्च निर्मितं वा तितीक्षां गृहे चेत्यर्थः स्वयं स्वतंत्रं भ्रमि भ्रमणस्वभावं ८ विपश्चितः सर्वज्ञस्य स्व
पितुरादेशमात्मनोनुरूपमविद्वांसो जानन्तः सर्वांश्चैव एकपुरुषराष्ट्रमित्यादि अविज्ञाय अहो लोकं सर्गं करिष्यथेत्यन्वयः
९ वाचः कूटं परोक्षवादेन गूढार्थं तरमिव प्रतीयमानं वचनं औत्पत्तिकी सहजा मनीषा विचारशक्तिर्यस्याः तया धिया स्वय
मेव विममृशुः विचारितवन्तः १० नारदोक्तं दृष्टान्ता कूटानां ते विमृश्य निर्णीतान् अर्थान् आहुः दशभिः श्लोकैः अदृष्ट्वा तस्य अन्तं
भूः शब्दार्थमाह भूरिति लिंगशरीरं जीवसंज्ञं लिंगशरीरं यत् निजबन्धनम् आत्मनो बन्धकारणं श्लोकेन राष्ट्रार्थमाह निर्वाणं

एकरूपमित्यस्यार्थमाह एकएवेतितत्र्यः सर्वसाक्षीस्वाश्रयः स्वाधारः स्वभवं नित्यमुक्तं श्रसद्भिः ईश्वरसमर्पितैः क
र्मभिः १२ विवर्त्तहेतुर्निर्गमं इत्यस्यार्थमाह प्रमान्यहमाशाप्यविसर्गपाताल्लगनइवमेवेतिनावर्तनेनतत्प्रत्यक्
धामज्योतीरूपंब्रह्मश्रुविदः श्रविदुषः श्रसद्भिः नश्वरस्वर्गादिसाधनैः कर्मभिः १३ बहुरूपोस्थियमित्यस्यार्थमाह
नानारूपेतिसैवगिरणीपुश्चलीवविमोहकैः रजआदिगुणैः श्रविततानविष्टोनस्याभ्रवसानेविवेकेश्रगतस्यश्रमस्यस
द्भिरवसानेः १४ पुमांसंपुंश्चलीपतिमित्यस्यार्थमाह तस्याः संयोगेनप्रेरितमेश्वर्यंस्मानेवयस्यकृत्मिनाभार्यायस्य
नदृत्तनस्याः गतीः स्वावेडः स्वलक्षणाः संसरंतंजीवबुधस्यश्रज्ञानतश्रसद्भिर्बुद्ध्याविवेकप्राप्तानैः १५ नदीमुभयतो
वाहामित्यस्यार्थमाह सृष्ट्याप्ययोकरीनीत्युभयतः प्रवाहोदर्शितः वेलाकूलेप्रवाहयतितानानिर्गमस्थानेनयो।

एकएवेश्वरस्तुर्योभगवान्स्वाश्रयःपरः तमदृष्ट्वाभवंपुंसः किमसत्कर्मभिर्भवेत् ११ प्रमात्रैवेतियन्न
नाविलसर्गमतोयथा प्रत्यक्धामाविदइह किमसत्कर्मभिर्भवेत् १३ नानारूपात्मनोबुद्धिः स्वैरि
णीवगुणान्विता तन्निष्ठामगतस्येह किमसत्कर्मभिर्भवेत् १४ तत्संगभ्रंशितैश्वर्यंसंसरंतंकुभार्य
वत् तद्गतीरबुधस्येह किमसत्कर्मभिर्भवेत् १५ सृष्ट्यप्ययकरीमायावेलाकूलांतवेगिता मत्तस्य
तामविज्ञस्य किमसत्कर्मभिर्भवेत् १६ पंचविंशतितत्त्वानांपुरुषोद्भुतदर्पणः अध्यात्ममबुधस्येहकि १८
मसत्कर्मभिर्भवेत् १७ ऐश्वर्यंशास्त्रमुत्सृज्यबन्धमोक्षानुदर्शनं विविक्तपदमज्ञायकिमसत्कर्मभिर्भवे

त्विष्यादितस्यांतोसमीपेवेगितांनिर्गमप्रतिबंधायकोथाहंकारादिभिः कृतवेगोमत्तस्यतद्वेगेनविवशस्यतनएव।
तांतथाभूतामविज्ञस्यश्रविचारयतः श्रसद्भिर्मायिकैः यदावेलाकूलेसमुद्रस्यव्यवहारस्थानेतस्यसमीपेसमुद्रवृद्धि
ह्रासाभ्यांपयाउभयोर्नवृद्धिः कृतवेगानदीभवति एवंसमुद्रतुल्यस्यात्मनोव्यवहारस्थानेदेहेजन्ममरणादिभिः कृ
तवेगामित्यर्थः वेगिनीमितिपाठेवेगवतीं १६ पंचपंचेतस्यार्थमाह पंचविंशतितत्त्वानांपुरुषोंतर्यामीश्रद्भुतदर्पणः
स्वाश्रयंरूपश्राश्रयः अध्यात्मंकार्यकारणसंघाताधिष्ठानारंतमबुधस्यश्रसद्भिः मिथ्यासाधनैरपहतैः १७ कार्विंशम
मित्यस्यार्थमाह ऐश्वर्यंईश्वरप्रतिपादकं विविक्तपदंविचरइदंपयस्तद्येनेतिहंसपादव्याख्यानेवंधमोक्षावनुदर्शी
यतीतितथाश्रनेनचविशः कथायस्यातिव्याख्यातंतदुत्सृज्यश्रनभ्यस्यश्रज्ञायश्रविदुषश्रसद्भिर्वहिर्मुखैः १८

तौरयव्याप्तमित्यस्यार्थमाह पंचेति कालचक्रमिति भ्रमिः भ्रमणात्मकं तीक्ष्णमिति निःकर्षयदिति वदोरपव्ययपदं व्याख्या
ततेत्यदबुधस्य अतपरफलस्यनित्यत्वबुद्ध्याकाम्यकर्मानुष्ठानेन भवत्येवाहल्यादसद्भिः १९ सपितुरादेशमित्यस्यार्थं
माह शास्त्रस्य स्वहत्यत्वात्पितुर्हीतीयनयत्नहेतोः तदनुरूपायनिवृत्त्यनुरूपायनिवर्तकमादेशं योनवेद सकथंगुणा
विस्त्रंभीगुणाग्नयप्रवृत्तिमार्गविश्वासवाननुउपक्रमेत् सस्वच्छादोषवर्तनमोदेशश्रम्सबुद्धीनाजीवमायातगात्मनाशा
स्वकालोपदेशानामज्ञानेकिमसत्कर्मभिः इतिवाचः कूटस्य ग्रहः श्लोकः २० इतिव्यवसिताःपंचनिश्चितवंतःपकचेतसःप
कमत्यग्रता तेनारदंप्रदक्षिणीकृत्यप्रयुनरावृत्तिमार्गंप्रययुः २१ निर्भातःसाक्षात्कृतोयोहृषीकेशःतस्यपदांबुजे

कालचक्रं भ्रमिस्तीक्ष्णं सर्वं निष्कर्षयज्जगत् स्वतंत्रमबुधस्येहकिमसत्कर्मभिर्भवेत् १९ शास्त्रस्यपितुरा
देशं योनवेदनिवर्तकं कथंतदनुरूपायगुणविस्रम्भ्युपक्रमेत् २० इतिव्यवसिताराजन्हर्यश्वाएकचेतसः
प्रययुस्तंपरिक्रम्यपंथानमनिवर्तनं २१ स्वरब्रह्मणिनिर्भातहृषीकेशपदांबुजे अखंडंचित्तमावेश्यलो
कानन्वचरन्मुनिः २२ नाशंनिशम्यपुत्राणांनारदाच्छीलशालिनां अन्वतप्यतकःशोचन्सुप्रजस्त्वंशुचां
पदं २३ सभूयःपांचजन्यायामजेनपरिसांत्वितः पुत्रानजनयद्दक्षःसवलाश्वान्सहस्रशः २४ तेचपित्रा
समादिष्टाःप्रजासर्गेधृतव्रताः नारायणसरोजग्मुर्यत्रसिद्धाःस्वपूर्वजाः २५ तदुपस्पर्शनादेवविनिर्धूत
मलाशयाः जपंतोब्रह्मपरमंतेपुस्तत्रमहत्तपः २६ अब्भक्षाःकतिचिन्मासान्कतिचिद्वायुभोजनाः आ
राधयन्मंत्रमिममभ्यस्यंतइडस्पतिं २७ ॐनमोनारायणायपुरुषायमहात्मने विशुद्धसत्वधिष्ण्यायम
हाहंसायधीमहि २८ इतितानपिराजेंद्रप्रतिसर्गधियोमुनिः उपेत्यनारदःप्राहवाचःकूटानिपूर्ववत् २९
दाक्षायणाःसंशृणुतगदतोनिगमंमम अन्विच्छतानुपदवींभ्रातॄणांभ्रातृवत्सलाः ३० ॥

अनुचरन्नुअन्वचरदित्यर्थः २२ नाशमदर्शनंस्वधर्मभ्रंशंचशीलेनशालंतेशोभंतेइतितथातेषांकःदक्षःसुप्रजस्त्वं
सत्पुत्रवत्वंपुत्रोशोकानांस्थानं २३ अजेनब्रह्मणासहस्रशःसहस्रसंख्यान् २४ २५ परमंब्रह्मप्रणववक्ष्यमाण
मंत्रंवा २६ इडस्पतिंवाचांमंत्राणांपतिंविष्णुमाराधयामासुः २७ विशुद्धसत्वाश्रयायपरमहंसायनमाधीमहि २८ प्र
तिसर्गधीर्येषांतान्वाचःकूटानिप्रहदृष्टानेअवद्रत्यादीनिपूर्वोक्तानिप्राह २९ हेदाक्षायणाःसंशृणुतेत्यादिपुनरप्याह

पिताहनिगमस्तूपदेशंमन्विच्छतअग्रजलोकपत ३०

शायणं प्रकृष्टं गमनं प्रायणमेव बन्धुर्यस्य मरुद्भिर्भ्रातृवत्सलैर्देवैः ३१ अमोघं दर्शनं यस्य हे मारिष आर्य ३२ सध्रीचीनं सम्यञ्चीनं प्रत्यगात्मज्ञानलभ्यमनुपथं मार्गं गता यथा न पश्चिमा यामिनीः गताः रात्रयस्तद्वत् ३३ ३४ पुत्राणां नाशमहं स्य निशम्य उपशुश्राव अदर्शनादपि शापप्रशोकविमूर्छितः स्यादिति तद्दर्शनप्रकारार्थं देवर्षिः तत्रागतः तदा तमुपलभ्य दक्ष आह ३५ साधो इति साधुलिङ्गं वेषो यस्य तेन त्वया नोऽस्मदीयानामर्भकानामसाधु अकारि कृतं तदेवाह साधूनां स्वधर्मप्रवृत्तानां भिक्षोर्मार्गः संप्रदर्शितः ३६ ननु सन्न्यासिनो मार्गः साधुरेव मोक्षहेतुत्वात् सत्यं ऋणत्रयापाकरणाद्विना तु महाननर्थ इत्याह ऋणैरिति जायमानो वै ब्राह्मणः त्रिभिर्ऋणैर्ऋणवान् जायते ब्रह्मचर्येणर्षिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः

भ्रातॄणां प्रायणं भ्राता योऽनुतिष्ठति धर्मवित् स पुण्यबन्धुः पुरुषो मरुद्भिः सह मोदते ३१ एतावदुक्त्वा प्र-
ययौ नारदोऽमोघदर्शनः तेऽपि चान्वगमन्मार्गं भ्रातॄणामेव मारिष ३२ सध्रीचीनं प्रतीचीनं परस्यानुप-
थं गताः नाद्यापि ते निवर्तन्ते पश्चिमा यामिनीरिव ३३ एतस्मिन्काल उत्पातान्बहून्पश्यन्प्रजापतिः
पूर्ववन्नारदकृतं पुत्रनाशमुपाशृणोत् ३४ चुक्रोध नारदायासौ पुत्रशोकविमूर्छितः देवर्षिमुपलभ्या-
ह रोषाद्विस्फुरिताधरः ३५ दक्ष उवाच अहो असाधो साधूनां साधुलिङ्गेन नस्त्वया असाध्वकार्यर्भकाणां
भिक्षोर्मार्गः प्रदर्शितः ३६ ऋणैस्त्रिभिरमुक्तानाममीमांसितकर्मणां विघातः श्रेयसः पाप लोकयोरु-
भयोः कृतः ३७ एवं त्वं निरनुक्रोशो बालानां मतिभिद्धरेः पार्षदमध्ये चरसि यशोहा निरपत्रपः ३८ ननु
भागवता नित्यं भूतानुग्रहकातराः ऋते त्वां सौहृदघ्नं वै वैरंकरमवैरिणां ३९

एवानृणो वा यः पुत्री यज्वा ब्रह्मचारी वासीदिति श्रुतेः ऋणैरमुक्तानाममीमांसितानि विचारितानि कर्माणि यैः तेषां तावदृणविमोक्षो नास्ति तदुत्तरकालभावित्वात् पुत्रोत्पादनयज्ञानुष्ठानयोरभावेन पितृदेवर्षिऋणविमुक्तिः पुनास्ति अतः ऐहिकविषयभोगत्यागात् इहलोके श्रेयसो विघातः कृतः मोक्षानधिकारित्वाच्च परलोकेऽपि श्रेयसो विघातः कृत इत्यर्थः तथा च मनुः ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यध इति ३७ बालानां मतिं पुत्रादिविषयां भिनत्तीति तथा एवं निरनुक्रोशः निर्घृणः हरेर्यशो नाशकः सन् तत्पार्षदानामध्ये कथं चरसि ३८ निर्लज्जमेवाह ननु ताः सन्ते भागवताः सर्वभूतानुग्रहपरवशाः ननु भूतानां विप्रियं कथं चरसि

श्री:
भा·ष·
टी·
१५

ननु वैराग्यमुपशमः उपशमाच्च भवतः स्नेहपाशच्छेदनं भवति न च विरक्तस्य मम गार्हस्थ्यापाकरणं आश्रयपूर्वकं यदहरेव विरजेत्तदहरेव प्रव्रजेत् यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेदित्यादि श्रुतेः अतो वैराग्योपदेशेन तेषामस्यानुग्रह एव कृत इति चेत्तत्राह नेति यद्यपि त्वमेवं मन्यसे तथापि मृषा केवलिना ज्ञानं विना वेषमात्रेण न यस्य मतिचाल नेकृतेऽपि पुंसां विरागो नैव स्यात् न च विरागं विनोपशमः न च तेन विना स्नेहपाशनिकृन्तनमित्यर्थः ४१ इत्थं वि रागो न स्यादित्यत्र हेतुमाह नानुभूयेति अननुभूय विषयाणां तीक्ष्णतां दुःखदत्वं न जानाति तस्माद्विषयानुभवेन तीक्ष्णत्वं जानात् ४२ अतस्त्वयास्माकमप्रियमेव कृतं तथापि वयं न क्षमे इत्याह यदिति कर्मसंधानां कर्ममर्यादानां

नेत्थं पुंसां विरागः स्यात्त्वया केवलिना मृषा मन्यसे यद्युपशमं स्नेहपाशनिकृन्तनं ४१ नानुभूय न जानाति
पुमान्विषयतीक्ष्णतां निर्विद्यते स्वयं तस्मान्न तथा भिन्नधीः परैः ४२ यन्नस्त्वं कर्मसंधानां साधूनां गृह
मेधिनां कृतवानसि दुर्मर्षं विप्रियं तव मर्षितं ४३ तंतुकृंतन यन्नस्त्वमभद्रमचरः पुनः तस्माल्लोकेषु ते
मूढ न भवेद्भ्रमतः पदं ४४ श्रीशुक उवाच प्रतिजग्राह तद्बाढं नारदः साधुसंमतः एतावान्साधुवादो हि
तितिक्षेतेश्वरः स्वयं ४५ इति भाग० षष्ठ स्कंधे पंचमो ऽध्यायः ५ श्रीशुक उवाच ततः प्राचेतसोऽसिक्न्याम
नुनीतः स्वयंभुवा षष्टिं संजनयामास दुहितॄः पितृवत्सलाः १ दश धर्माय कायेंदोर्द्विषट् त्रिणव दत्त
वान् भूतांगिरःकृशाश्वेभ्यो द्वे द्वे तार्क्ष्याय चापराः २ नामधेयान्यमूषां त्वं सापत्यानां च मे शृणु यासां
प्रसूतिप्रसवैर्लोका आपूरितास्त्रयः ३

कर्तृसंधानां कर्मपाठे विप्रियं कृतं मजानतामित्यर्थः तु: सह यत्त्वं कृतवानसि तन्मर्षितं सोढं ४३ तथापि न वा मरं भविष्यतीत्याह तंतुकृंतन संतानच्छेदक यद्यस्मात् अभद्रं पुत्राणां स्थानभ्रंशपदं स्थानेन भवेदिति ... नत्याम: ४४ बाढं तथेति स्वीकृतवान् ईश्वरोऽपि प्रतिशापसमर्थोऽपि तितिक्षेत सहेत इति यत् एतावानेव ४५ इति भा वा षष्ठे ध्येव ध्यायः ५ षष्ठे दक्षस्य कन्यानां वंशः प्रकीर्तिताः ... विश्वरूपादि तेः स्वतातत् नारदात्पुत्रगणनाशमाकर्ण्य ... जनयामास १ कायकश्यपाय द्विषट् द्विगुणाः षट् ... दश या स्ताः त्रयोदश इत्यर्थः इंदोः सोमाय त्रिणव सप्तविंशतिं ताः ... २ सापत्यानामपत्यसहितानां मे ...

ते: श्रीमद्भागवत टीका: षष्ठः स्कं: ५

४ ततोवेदऋषभात् ५ यतः कीकटात् भुवोदुर्गाणिदुर्गाभिमानिनोदेवाजामेयः जाम्याः पुत्रः स्वर्गः ६ तत्सुतः सा
ध्यानांमतः ७ ८ ९ वसोर्वंशस्यप्रपञ्चत्वादेवनिर्देशः मेमतः १० अभिमतिर्नामपत्नीतस्याहर्षादयः पुत्राः ११
सहआयुप्राणस्यपुरोजवश्चपूर्वः पुरः पुराणि १२ १३ स्कन्दश्चकृत्तिकास्ततोऽग्नेः पुत्राः षाण्मातुरइतिप्रसिद्धिरितिव

भानुर्लम्बाककुब्जामिर्विश्वासाध्यामरुत्वती वसुर्मुहूर्तासंकल्पाधर्मपत्न्यः सुतान्शृणु ४ भानोस्तु
वेदऋषभइन्द्रसेनस्ततोनृप विद्योतआसील्लम्बायाः ततश्चस्तनयित्नवः ५ ककुभः संकटस्तस्यकी
कटः तनयोयतः भुवोदुर्गाणिजामेयः स्वर्गोनंदिस्ततोभवत् ६ विश्वेदेवास्तुविश्वायाअप्रजांस्तान्प्र
चक्षते साध्योगणस्तुसाध्यायाः अर्थसिद्धिस्तुतत्सुतः ७ मरुत्वांश्चजयन्तश्चमरुत्वत्यावभूवतुः
जयन्तोवासुदेवांशउपेन्द्रइतियंविदुः ८ मौहूर्तिकादेवगणामुहूर्तायाश्चजज्ञिरे येवैफलंप्रयच्छन्ति
भूतानांस्वस्वकालजं ९ संकल्पायाश्चसंकल्पः कामः संकल्पजः स्मृतः वसवोऽष्टौवसोः पुत्राः तेषांनामा
निमेशृणु १० द्रोणः प्राणोध्रुवोऽर्कोऽग्निर्दोषोवस्तुर्विभावसुः द्रोणस्याभिमतेः पत्न्याहर्षशोकभया
दयः ११ प्राणस्योर्जस्वतीभार्यासहआयुः पुरोजवः ध्रुवस्यभार्याधरणिरसूतविविधाःपुरः १२ अ
र्कस्यवासनाभार्यापुत्रास्तर्षादयः स्मृताः अग्नेर्भार्यावसोर्धारापुत्राद्रविणकादयः १३ स्कन्दश्चकृत्ति
कापुत्रोयेविशाखादयः ततः दोषस्यशर्वरीपुत्रः शिशुमारोहरेःकला १४ वास्तोराङ्गिरसीपुत्रोविश्व
कर्माकृतीपतिः ततोमनुश्चाक्षुषोभूद्विश्वेसाध्यामनोःसुताः १५ विभावसोरसूतोषाव्युष्टंरोचिष
मातपं पंचयामोऽथभूतानियेनजाग्रतिकर्मसु १६ सरूपासूतभूतस्यभार्यारुद्रांश्चकोटिशः रैव
तोऽजोभवोभीमोवामउग्रोवृषाकपिः १७ अजैकपादहिर्बुध्न्योबहुरूपोमहानिति रुद्रस्यपार्षदाश्चान्ये

प्रसिद्धेः ततः संभवात् १४ आकृतीपतिः शिल्पाचार्यः ततोविश्वकर्मणः चाक्षुषोमनुरासीत् १५ उषाभार्याव्युष्टा
व्युष्टमातपंपंचयामोदिवसोजातः अतएवरात्रिस्त्रियामाप्रदोषप्रत्यूषयोर्दिवसत्वावयवत्वात् १६ भूतस्येदंभार्यत्वेनयो
र्दशमादहसन्नयेति १७ महानित्येवंप्रकारेशर्वरूपस्यरुद्रस्यपार्षदाः प्रेतादयः अन्येअन्यस्यांजाताः १८

[illegible]

श्री॰ भा॰ष॰ टी॰ १९

अंगिरसः स्वधा सतीचेति द्वे भार्ये तयोर्वंशमाह प्रजापतेरिति स्वधानाम पत्नी पितॄन् पुत्रत्वेनाकरोत् अथ सती चा-
थर्वांगिरसं नाम वेदं १९ कृशाश्वस्यार्चिर्धिषणेति द्वे भार्ये तयोर्वंशमाह कृशाश्व इति २० २१ सुपर्णा विन-
ता यत्नरूपिणी २२ रोहिण्यामेव प्रेमातिशयेनान्यासामुपेक्षणात् कुपितस्य दक्षस्य शापात् यक्ष्मग्रहः।

प्रजापतेरंगिरसः स्वधापत्नी पितॄनथ अथर्वांगिरसं वेदं पुत्रत्वे चाकरोत्सती १९ कृशाश्वोर्चिषिभा-
र्यायां धूम्रकेशमजीजनत् धिषणायां वेदशिरो देवलं वयुनं मनुं २० तार्क्ष्यस्य विनता कद्रूः पतं-
गी यामिनीति पतंगसूत पतगान्यामिनी शलभानथ २१ सुपर्णासूत गरुडं साक्षाद्यज्ञेशवाह-
नं सूर्यसूतमनूरुं च कद्रूर्नागाननेकशः २२ कृत्तिकादीनि नक्षत्राणीन्दोः पत्न्यस्तु भारत दक्षशापा-
त्सोनपत्यः तासु यक्ष्मग्रहार्दितः २३ पुनः प्रसाद्य तं सोमः कला लेभे क्षये दिताः शृणु नामानि
लोकानां मातॄणां शंकराणि च अथ कश्यपपत्नीनां यत्प्रसूतमिदं जगत् २४ अदितिर्दितिर्द-
नुः काष्ठा अरिष्टा सुरसा इला मुनिः क्रोधवशा ताम्रा सुरभिः सरमा तिमिः २५ तिमेर्यादोगणा
आसन् श्वापदाः सरमासुताः सुरभेर्महिषा गावो ये चान्ये द्विशफा नृप २६ ताम्रायाः श्येनगृध्रा-
द्या मुनेरप्सरसां गणाः दंदशूकादयः सर्पा राजन् क्रोधवशात्मजाः २७ इलाया भूरुहाः सर्वे या-
तुधानाश्च सौरसाः अरिष्टायास्तु गंधर्वाः काष्ठाया द्विशफेतराः २८ सुता दनोरेकषष्टिस्तेषां प्रा-
धानिकान् शृणु द्विमूर्धा शंबरोरिष्टो हयग्रीवो विभावसुः २९ अयोमुखः शंकुशिराः स्वर्भानुः क-
पिलोरुणः पुलोमा वृषपर्वा
च एकचक्रोनुतापनः
इ॰

दितः क्षयरोगपीडः सन् तास्वनपत्यो भूतस्ते दक्षं प्रसाद्य केवलं कला एव लेभे न तु पत्या लिकं भूताः क्षये कृष्ण-
पक्षे दिताः खंडिताः सतीः पाठांतरे क्षये सति पुनर्वर्धिताः तेनैव वर्धिताः सती २३ अल्पत्वेन स्वगमनादयस्य
सुगमेनोक्तं सोमवंशानाह तिमेरित्यादिना २५ २७ सौरसाः सुरसायाः पुत्राः २८ प्राधानिकान् प्रधान

वैश्वानरेणोदत्ताः पुत्रः तस्य सुताः ३२ कः प्रजापतिः कश्यप उपयेमे दानवीपरिणायनेहेतुः ब्रह्मणाचोदितइति
३३ तयोः षष्टिसहस्राणि निवातकवचाः प्रजाताः ३४ तान् स्वर्गं गतः सन् ते पितामहोऽर्जुनो जघान ३५ राहु

धूमकेतुप्रमुखविनुपाहात्तोविप्रचित्तिमत्त्वर्ग्नयः सर्भानोः स्वर्भानोः कन्यामुपाहत नमुचिः किल। वृषपर्वणस्तु
शर्मिष्ठा ययातिनी नहुषो बली ३१ वैश्वानरसुतायाश्च चतस्रश्चारुदर्शनाः उपदानवी हयशिरा पुलो
माकालकातथा ३२ उपदानवीं हिरण्याक्षः क्रतुर्हयशिरां नृप पुलोमां कालकां च द्वे वैश्वानरसुते तु
कः ३३ उपयेमेऽथ भगवान्कश्यपो ब्रह्मचोदितः पौलोमाः कालकेयाश्च दानवा युद्धशालिनः तयोष
ष्टिसहस्राणि यज्ञघ्नांस्तेपितुः पिता ३४ जघान स्वर्गतो राजन्नेक इन्द्रप्रियंकरः विप्रचित्तिः सिंहिका
यां शतं चैकमजीजनत् राहुज्येष्ठं केतुशतं ग्रहत्वं य उपागताः ३५ अथातः श्रूयतां वंशो योऽदितेरनु
पूर्वशः यत्र नारायणो देवः स्वांशेनावातरद्विभुः ३६ विवस्वानर्यमा पूषा त्वष्टाथ सविता भगः धाता
विधाता वरुणो मित्रः शक्र उरुक्रमः ३७ विवस्वतः श्राद्धदेवं संज्ञासूयत वै मनुं मिथुनं च महाभा
गा यमं देवं यमीं तथा सैव भूत्वाथ वडवा नासत्यौ सुषुवे भुवि ३८ छाया शनैश्चरं लेभे सावर्णिं च मनुं
ततः कन्यां च तपतीं या वै वव्रे संवरणं पतिं ४० अर्यम्णो मातृका पत्नी तयोश्चर्षणयः सुताः यत्र वै
मानुषी जातिर्ब्रह्मणा चोपकल्पिता ४१ पूषानपत्यः पिष्टादो भग्नदन्तोऽभवत्पुरा योऽसौ दक्षाय कुपितं
जहास विवृतद्विजः ४२ त्वष्टुर्दैत्यात्मजा भार्या रचना नाम कन्यका संनिवेशस्तयोर्जज्ञे विश्वरूपश्च वी
र्यवान् ४३ तं वव्रिरे सुरगणाः स्वस्रीयं द्विषतामपि विमतेन परित्यक्ता गुरुणाङ्गिरसेन यत् ४४ इ

तिश्रीभागवतेष स्कंधेष ध्यायः ६ ॥

ज्येष्ठो येषां ३६ ३७ ३८ असूयत अजनयत भुवि वर्तमाना ३९ ततः विवस्वतः ४० चर्षणयः कृताकृतज्ञान
वंतः पशुपतिकर्मवैतनिचेष्टायुक्ताः यत्र येषु आत्मान्स्वस्थानविशेषेण मानुषी जातिश्चोपकल्पिता तथाव क्ष
तिः पुरुषत्वे चावासिरामात्मन्ति ४१ कुपितं हसमिति शेषः विवृतद्विजः प्रकटितदंतः सन् ४२ ४३ यद्यदा विमते
न स्त्र्यवत्यागेन बृहस्पतिनापरित्यक्तास्तदा द्विषतामसुराणां भागिनेयमपि विश्वरूपं पौरोहित्ये वृतवंतः ४४ इतिर

श्रीः
भा॰ ष॰
टी॰
७

सप्तमे विश्वरूपस्य पौरोहित्ये वृतः सुरैः गुरुणा संपरित्यक्तैः पौरोहित्यमथाकरोत् कस्य हेतोः कस्माद्धेतोः आत्मन
शिष्याः सुराः परित्यक्ता अक्रमम् अपराधं १ स इंद्रो यदा सभायां वाचस्पतिं नाभ्यनंदत् नादृतवान् तदा स त्रैशिरसः
२ परिश्रितः परिवृतः ३ ४ आस्थाने सभवाने ... सिंहासने तत्र स्थितः ५ पारमेष्ठ्यं महाराजचिह्नैः ।
आसनस्याद्धे स्थित या पौलोम्या सह विराजमानः सन् ६ अभ्युत्थानादिना नाभ्यनंदत् ७ न चाचालयदासनम्

राजोवाच

कस्य हेतोः परित्यक्ता आचार्येणात्मनः सुराः एतदाचक्ष्व भगवन् शिष्याणामक्रमं गुरौ १ श्रीशुक उवा
च इंद्रस्त्रिभुवनैश्वर्यमदोल्लंघितसत्पथः मरुद्भिर्वसुभिः रुद्रैरादित्यैरृभुभिर्नृप २ विश्वेदेवैश्च
साध्यैश्च नासत्याभ्यां परिश्रितः सिद्धचारणगंधर्वैर्मुनिभिर्ब्रह्मवादिभिः ३ विद्याधराप्सरोभिश्च
किन्नरैः पतगोरगैः निषेव्यमाणो मघवान् स्तूयमानश्च भारत ४ उपगीयमानो ललितमास्थानाध्या
सनाश्रितः पांडुरेणातपत्रेण चंद्रमंडलचारुणा ५ युक्तश्चान्यैः पारमेष्ठ्यैश्चामरव्यजनादिभिः वि
राजमानः पौलोम्या सहार्द्धासनया भृशम् ६ स यदा परमाचार्यं देवानामात्मनश्च ह नाभ्यनंदत सं
प्राप्तं प्रत्युत्थानासनादिभिः ७ वाचस्पतिं मुनिवरं सुरासुरनमस्कृतं नोच्चचालासनादिंद्रः पश्यन्नपि
समागतं ८ ततो निर्गत्य सहसा कविरांगिरसः प्रभुः आययौ स्वगृहं तूष्णीं विद्वान् श्रीमदविक्रियां
९ तर्ह्येव प्रतिबुध्येंद्रो गुरुहेलनमात्मनः गर्हयामास सदसि स्वयमात्मानमात्मना १० अहो बत म
यासाधु कृतं वै दभ्रबुद्धिना यन्मयैश्वर्यमत्तेन गुरुः सदसि कात्कृतः ११ को गृध्येत्पंडितो लक्ष्मीं त्रिवि
ष्टपपतेरपि ययाहमासुरं भावं नीतोद्य विबुधेश्वरः १२ ये पारमेष्ठ्यं धिषणमधितिष्ठन्न कंचन प्र
त्युत्तिष्ठेदिति ब्रूयुर्धर्मं ते न परं विदुः १३ तेषां कुपथदेष्टॄणां पततां तमसि ह्यधः ये श्रद्दध्युर्वचस्ते वै म
ज्जंत्यश्मप्लवा इव १४ ॥

त्र स्थितोपि किंचिन्न चलितवान् ८ श्रीमदेन या विक्रिया तां विद्वान् जानन् ९ प्रतिबुध्य स्मृत्वा १० मया
तस्य हा असाधु यस्मात् दभ्रबुद्धिना अल्पमतिना मया का कृतः तिरस्कृतः ११ त्रिविष्टपस्य स्वर्गस्य देवानामीश्व
रोप्यहं १२ ननु सिंहासनस्थस्याभ्युत्थानेन कः दोष इति तत्राह ये इति हाः धिषणमासनं १३ कुपथं

अगाधा गंभीरा धिषणा यस्य तं निशठः शाठ्यहीनः सन् १५ अधिकया आत्ममायया १६ गुरोः संज्ञां ज्ञानं नैपायं परीक्षमाणो
पि नाधिगतः अशर्मा सन् १७ आततायिनः उद्यतास्त्राः १८ निर्भिन्नान्यंगानि ऊरवो भागा निशिरांसि उरवो बाहवश्च येषां १९ २०
वो युष्माकं कृतं कारणं महद् अभद्रं तदाह ब्रह्मिष्ठमिति नाभ्यनंदत नाभिनंदितवंतः २१ परेभ्यः शत्रुभ्यो वः पराभव इति यत्
अनयस्य अन्यायस्य संबन्धी फलं रूपमासीत् उक्तं च ब्राह्मणकुलसंपन्नभक्तविसो महात्मनः आयोनवीक्ष्यनोत्रिष्टे
स्तद्दुःखे पातिभूयते स्वयमेव वैरिणो हता ये येषां तेभ्यः २२ गुरुतिरस्कार एव कारणं एव अपचयोपचयकारणमित्याह

अथाहममराचार्यमगाधधिषणं द्विजं प्रसादयिष्ये निशठः शीर्ष्णा तच्चरणं स्पृशन् १५ एवं चिंतयतस्त
स्य मघोनो भगवान्गृहात् बृहस्पतिर्गतोऽदृष्टां गतिमध्यात्ममायया १६ गुरोर्नाधिगतः संज्ञां परीक्षन्भ
गवान्स्वराट् ध्यायन्धिया सुरैर्युक्तः शर्म नालभतात्मनः १७ तच्छ्रुत्वैवासुराः सर्व आश्रित्यौशनसं मतं दे
वान्प्रत्युद्यमं चक्रुर्दुर्मदा आततायिनः १८ तैर्विसृष्टेषुभिस्तीक्ष्णैर्निर्भिन्नांगोरुबाहवः ब्रह्माणं शरणं ज
ग्मुः सहेन्द्रा नतकन्धराः १९ तांस्तथाभ्यर्दितान्वीक्ष्य भगवानात्मभूरजः कृपया परया देव उवाच परिसांत
यन् २० ब्रह्मोवाच अहो बत सुरश्रेष्ठा ह्यभद्रं वः कृतं महत् ब्रह्मिष्ठं ब्राह्मणं दांतमैश्वर्यान्नाभ्यनन्दत २१
तस्यायमनयस्यासीत्परेभ्यो वः पराभवः प्रक्षीणेभ्यः स्ववैरिभ्यः समृद्धानां च यत्सुराः २२ मघवन्द्विषतः
पश्य प्रक्षीणान्गुर्वतिक्रमात् संप्रत्युपचितान्भूयः काव्यमाराध्य भक्तितः आददीरन्निलयनं ममापि भृगुदे
वताः २३ त्रिपिष्टपं किं गणयंत्यभेद्यमंत्रा भृगूणामनुशिक्षितार्थाः न विप्रगोविंदगवीश्वराणां भवंत्यभ
द्राणि नरेश्वराणां २४ तद्विश्वरूपं भजताशु विप्रं तपस्विनं त्वाष्ट्रमथात्मवंतं सभाजितोऽर्थान्स विधास्यते वो
यदि क्षमिष्यध्वमुतास्य कर्म २५ शुक उवाच त एवमुदिता राजन्ब्रह्मणा विगतज्वराः ऋषिं त्वाष्ट्रमुपव्रज्य
परिष्वज्येदमब्रुवन् २६

दृष्टांतेनाह मघवन्निति द्विषतः शत्रून् काव्यं भार्गवं गुरुमेव सेव्योपचितान् उपचितत्वमेवाह आददीरन् हृ
त्वाीयुः २३ अभेद्यो मंत्रो येषां अनुशिक्षितार्थाः शिष्यायत्तः विप्रा गोविंदो गावश्च ईश्वराः मंत्रग्राहकाः येषां तेषामेव
अभद्राणि न भवंति अन्येषां तु भवंत्येव २४ तत्तस्मात् अथ अनंतरमेव भजत अस्य कर्म अस्मत्पराभवरूपं यदि तर्हि २५ उदितास्तु उक्ताः २६

श्री॰
भा॰ध॰
टी॰
२८

अतिथीनां पितॄणां च प्रशंसां साहसमाहुः २७ २८ आचार्य उपनीय वेदाध्यापकः ब्राह्मणो वेदस्य मूर्तिः २९ धर्मस्यात्मा मू
र्तिरतिथिः स्वयं साक्षादात्मनः भ्राता विसोढा आत्मनः स्वस्य सर्वभूतेष्वात्मदृष्टिः कर्तव्येत्यर्थः ३० एतेभ्यः पराभव
पराजितः ३१ सन्देशमाह तूष्णीमहमिति ३२ ननु पाध्यायत्वेन कनिष्ठस्य ममाभिवदनं करिष्यतीति विगर्हिते न
माहुः नेति अर्थेषु उपाध्यायजननिमित्तयविष्ठानामभिवदनेन निंदति किंच छंदोभ्यः मन्त्रेभ्योऽन्यत्र वयोज्येष्ठस्य कारणं
न भवति किंतु वेदाध्यापकत्वमेव तस्मात् वयः वेदज्ञत्वाद्येव मेव ज्येष्ठमित्यर्थः ३३ निंदितमपीत उपाध्यायाज्ञाभंगमभ

देवाद्युवाच वयं नेतिष्ठयः शास्त्रा ग्राम्यं मे भद्रमस्तु ते काम संपाद्यतां तात पितॄणां सममयाचितः २७ पुराणं
ह्यपरो धर्मः पितृशुश्रूषणात्मनः अपि पुत्रवतो ब्रह्मन् किमुत ब्रह्मचारिणः २८ आचार्यो ब्रह्मणो मूर्तिः पिता
मूर्तिः प्रजापतेः भ्राता मरुत्पतेर्मूर्तिर्माता साक्षात् क्षितेस्तनुः २९ दयाया भगिनी मूर्तिर्धर्मस्यात्मातिथिः
स्वयं अग्नेरभ्यागतो मूर्तिः सर्वभूतानि चात्मनः ३० तस्मात् पितॄणामार्तानामार्तिं परपराभवं तपसापनय
ना नेतीत सन्देशं कर्तुमर्हसि ३१ तूष्णीमहं वोपाध्याय ब्रूमि इष्ट ब्राह्मणा गुरु यथाञ्जसा विजेष्यामः सपत्नां
स्तव तेजसा ३२ न गर्हयति शिष्येषु यविष्ठाग्राभिवदने छन्दोभ्योऽन्यत्र न ब्रह्मन् वयो ज्यैष्ठ्यस्य कारणं ३३
ऋषिरुवाच अभ्यर्थितः सुरगणैः पौरोहित्ये महातपाः स विश्वरूपस्तानाह प्रसन्नः श्लक्ष्णया गिरा ३४
विश्वरूप उवाच विगर्हितं ब्रह्मणोऽपि ब्रह्मवर्चउपव्ययं कथं तमद्विधो नाथा लोकेशैरभियाचितम् ३५
प्रत्याख्यास्यति तच्छिष्यः स एव स्वार्थ उच्यते ३५ अकिंचनानां हि धनं शिलोञ्छनं तेनेह निर्वर्तितसाधुसत्

ह्रियः कथं विगर्हितं कुर्वतो ह्यधीश्वराः
पौरोधमहृष्यति येन इमं तिः ३८

येन कद्विद्यामीत्याह सार्धेन विगर्हितं पौरोहित्यं धर्मघ्नीः अधर्महेतुत्वात् किंच ब्रह्मवर्चउपव्ययं हर्व सिद्धस्य ब्रह्म
वर्चसो व्ययकरं प्रत्याख्यातं न च माहशो नार्हतीत्याह कथमिति तेषां शिष्यः शिक्षणार्हः स एव प्रत्याख्यानाभाव
एव शिष्यस्य स्वार्थ उच्यते ३५ ननु पौरोहित्येन धनलाभाद्धर्मः सिद्ध्येत् अन्यथा निर्धनस्य कुतो धर्मः अत एव तेन लोका
हृष्यति तत्राह अकिंचनानां शिलोञ्छनं हि धनं देवेशानामुपेत्य तत्कणशो यदादानं शिलं उद्धृतपतितव्रीह्यादेरुपादा
नमुञ्छनं इदं यहा अमते नेवानिर्वर्तिताः साधूनां सत्क्रिया येन ३६

२८

क्रियेतेतत्प्रार्थितमल्पमेव अभ्यधिकमपि करिष्यामीत्याह भवतामपि ३० समाधिनापरमोद्यमेन ३८ वैसव्याष्ट्री
नारायणकवचात्मिकया ३९ असुरवरूथः दैत्यसेनाः ४० इति भा षे पि या घ स्कं स मो यः ७ अष्टमे वि
श्वरूपस्तद्वर्मनारायणात्मकं इन्द्राय शक्राय प्राहयेनेन्द्रो गुप्तो दैत्यानजयत् त्रिलोक्याः संबन्धिनीं श्रियं १ मन्त्राभ्यामष्टाक्षर
द्वादशाक्षराभ्यां कृतः स्वाङ्गेषु करयोश्च न्यासो येन नारायणमयं परं वर्म संनह्येत्तद्बध्नीयात् ५ तत्राष्टाक्षरेणापादय

तथापि न प्रतिब्रूयां गुरुभिः प्रार्थितं कियत् भवतां प्रार्थितं सर्वं प्राणैरर्थैश्च साधये ३२ बादरायणिरुवा
च तेभ्य एवं प्रतिश्रुत्य विश्वरूपो महातपाः स विश्वरूपस्तानाह प्रसन्नः श्लक्ष्णया गिरा पौरोहित्यं वृतश्चक्रे
परमेण समाधिना सुरद्विषां श्रियं गुप्तामौशनस्यापि विद्यया आच्छिद्यादान्महेन्द्राय वैष्णव्या विद्यया वि
भुः ३९ यया गुप्तः सहस्राक्षो जिग्येऽसुरचमूर्विभुः तां प्राह स महेन्द्राय विश्वरूप उदारधीः ४० इति ग ते
षष्ठे ये म ध्यायः ७ राजोवाच यया गुप्तः सहस्राक्षः सवाहान्रिपुसैनिकान् क्रीडन्निव विनिर्जित्य
त्रैलोक्यां बुभुजे श्रियं १ भगवंस्तन्ममाख्याहि वर्म नारायणात्मकं यथाततायिनः शत्रून्येन गुप्तोऽजयन्मृ
धे २ बादरायणिरुवाच वृतः पुरोहितस्त्वाष्ट्रो महेन्द्रायानुपृच्छते नारायणाख्यं वर्माह तदिहैकमनाः
शृणु ३ विश्वरूप उवाच धौताङ्घ्रिपाणिराचम्य सपवित्र उदङ्मुखः कृतस्वाङ्गकरन्यासो मन्त्राभ्यां वाग्य
तः शुचिः ४ नारायणपरं वर्म संनह्येद्भय आगते पादयोर्जानुनोरूर्वोरुदरे हृद्यथोरसि ५ मुखे शिरस्यानुपू
र्व्यादोंकारादीनि विन्यसेत् ॐ नमो नारायणायेति विपर्ययमथापि वा ६ करन्यासं ततः कुर्याद्द्वाद
शाक्षरविद्यया प्रणवादियकारान्तमङ्गुल्यङ्गुष्ठपर्वसु ७ न्यसेद्धृदय ओंकारं विकारमनु मूर्धनि षका
रं तु भ्रुवोर्मध्ये णकारं शिखया दिशेत् ८

षडङ्गन्यासमाह पादयोरिति सार्धेन प्रणवसंपुटितमोंकारादेकैकमक्षरं विन्यसेत् विपर्ययं यथा भवत्येवं शिरः
प्रादिपादान्तं वा विन्यसेत् उत्पत्तिन्यासं संहारन्यासं वा कुर्यादित्यर्थः ६ द्वादशाक्षरस्य पोद्धारः प्रणवादियकारान्तमि
ति प्रणवसंपुटितमेकैकमक्षरं दक्षिणतर्जनीमारभ्य वामतर्जनीपर्यन्तमङ्गुलीषु परिशिष्टमक्षरचतुष्टयमङ्गुष्ठयो राद्यन्त

श्रीः भा· ष· टी· ५५

मंत्रांतरन्यासमाह न्यसेदिति षकारणकारयोर्विश्लेषेण षडक्षराणि हृदयादिषु न्यसेत् मकारमस्त्रमुद्दिश्य ध्यात्वा तत्
स्मकारात्त्व्रमः अस्त्राय फडित्येवं दिक्षु न्यस्य विनिर्दिशेत् ४ ध्येयमीश्वररूपमात्मानं ध्यायेत् षड्भिः शक्तिभिः ऐश्वर्यभगव
त्त्वशक्तिवाच्याभिः विद्यावतेजस्तपमूर्तिर्यस्य तं इमं वक्ष्यमाणं श्रीनारायणकवचाख्यं १० अष्टगुणः अणिमाद्यष्टै
श्वर्ययुक्तः ११ यादसां गणा एव वरुणस्य पाशास्तस्मात् ११ अटवी आजिमुखं संग्रामो विग्रहस्थादिर्येषां तेषु संकटस्था
नेषु १२ असौ प्रसिद्धो वराहो नाम अध्वनि रक्षतु यज्ञैरवयवैः रूपं कल्प्यते निरूप्यत इति तथा श्रीनारायणाय नमः

वकारं नेत्रयोर्युञ्ज्यान्नकारं सर्वसन्धिषु मकारमस्त्रमुद्दिश्य मंत्रमूर्तिर्भवेद्बुधः सविसर्गं फडन्तं तत्सर्वदिक्षु
विनिर्दिशेत् ४ आत्मानं परमं ध्यायेद्ध्येयं षट्शक्तिभिर्युतं विद्यातेजस्तपोमूर्तिमिमं मंत्रमुदाहरेत् १० ओं
हरिर्विदध्यान्मम सर्वरक्षां न्यस्तांघ्रिपद्मः पतगेन्द्रपृष्ठे दरारिचर्मासिगदेषुचापपाशान्दधानोऽष्टगुणो
ऽष्टबाहुः ११ जलेषु मां रक्षतु मत्स्यमूर्तिर्यादोगणेभ्यो वरुणस्य पाशात् स्थलेषु मायावटुवामनोऽव्यात्
त्रिविक्रमः खेऽवतु विश्वरूपः १२ दुर्गेष्वटव्याजिमुखादिषु प्रभुः पायान्नृसिंहोऽसुरयूथपारिः विमुञ्चतो
यस्य महाट्टहासं दिशो विनेदुर्न्यपतंश्च गर्भाः १३ रक्षत्वसौ माध्वनि यज्ञकल्पः स्वदंष्ट्रयोन्नीतधरो वरा
हः रामोऽद्रिकूटेष्वथ विप्रवासे सलक्ष्मणोऽव्याद्भरताग्रजोऽस्मान् १४ मामुग्रधर्मादखिलात्प्रमादान्ना
रायणः पातु नरश्च हासात् दत्तस्त्वयोगादथ योगनाथः पायाद्गुणेशः कपिलः कर्मबन्धात् १५ सन
त्कुमारोऽवतु कामदेवाद्धयशीर्षा मां पथि देवहेलनात् देवर्षिवर्यः पुरुषार्चनान्तरात्कूर्मो हरिर्मां निरया
दशेषात् १६ धन्वन्तरिर्भगवान्पात्वपथ्याद्द्वन्द्वाद्भयादृषभो निर्जितात्मा यज्ञस्तु लोकादवताज्जनान्ताद्बलो गणात्क्रोधवशात्

अद्रिकूटेषु गिरिशिखरेषु रामो जामदग्न्यः १३ उग्रधर्मात् अभिचारादिलक्षणात् हासात् गर्वात् नरः अवतु दत्तो दत्तात्रेयः अ
योगात् योगभ्रंशात् १४ पथि यद्देवानां हेलनं नमस्काराकरणं तस्मात् पुरुषार्चनस्यान्तरात् देवभजनाच्छिद्रात् दारिश
ट्यपरायणपात्रादेः १५ लोकात् जनापवादात् यज्ञः जननिमित्तो योऽन्तः पश्चात्तः तस्मात् बलभद्रः अवतात् कृतान्तादिति पाठे
कृतान्तात् कालात् रक्षतु क्रोधवशात् सर्पगणात् अहीन्द्रः शेषः १६ कालमलभूतात् कलेः कल्किः धर्मरक्षणाय उरु महान् कृतोऽवतारो येन १७

५५

दिनस्यषट्स्वभागेषुक्रमेणा प्रातरादिसंज्ञेषु रात्रावपि प्रदोषादिसंज्ञेषु रक्षाप्रार्थनं मांकेशव इति त्रिभिः प्रातः संगवे सं
गवमोमध्याह्ने १८ त्रियामा ब्रह्मादित्रिमूर्तिः श्रीमाधवः दोषे प्रदोषे अर्धरात्रे अर्धरात्रपर्यंतकाले निशीथे चपक
पद्मनाभोवतु १९ अपररात्रे ईशः श्रीवत्सधामावतु प्रत्यूषे ईशः श्रीजनार्दनः श्रीदामोदरः प्रभाते श्रीविश्वमू
र्तिरनुसन्ध्यं प्रतिसन्ध्यं २० युगान्तानलवत्तिग्मा तीक्ष्णा नेमिर्यस्य तच्चक्रं भगवता प्रयुक्तं सत् परिसैन्यं दंदग्धि प्रति
प्रायेन दहति तत्स्वायस्वभावपवनेरतस्मात्त्रायेनीयामित्यर्थः पञ्चादं दंदग्धीति लोलामध्यमपुरुषः प्रत्यवमेवं भूते

मांकेशवो गदया प्रातरव्याद्गोविंद आसंगवमात्तवेणुः नारायणः प्राह्ण उदात्तशक्तिर्मध्यन्दिने विष्णु
ररीन्द्रपाणिः १८ देवोपराह्णे मधुहोग्रधन्वा सायंत्रिधामावतु माधवो मां दोषे हृषीकेश उतार्धरात्रे
निशीथ एकोवतु पद्मनाभः १९ चक्रं युगान्तानलतिग्मनेमि भ्रमत्समन्ताद्भगवत्प्रयुक्तं दंदग्धि दंद
ग्ध्यरिसैन्यमाशु कक्षं यथा वातसखो हुताशः २१ श्रीवत्सधामापररात्र ईशः प्रत्यूष ईशोसिधरो ज
नार्दनः दामोदरोव्यादनुसन्ध्यं प्रभाते विश्वेश्वरो भगवान्कालमूर्तिः २० गदेशनिस्पर्शनविस्फुलि
गे निष्पिंढि निष्पिंढ्यजितप्रियासि कूष्मांडवैनायकयक्षरक्षोभूतग्रहांश्चूर्णय चूर्णयारीन् २२ त्वं यातुधानप्र
मथप्रेतमातृपिशाचविप्रग्रहघोरदृष्टीन् दरेन्द्र विद्रावय कृष्णपूरितो भीमस्वनोरेर्हृदयानि कंपय
न् २३ त्वं तिग्मधारासिवरारिसैन्यमीशप्रयुक्तो मम छिंधि छिंधि चक्षूंषि चर्मञ्छतचन्द्र छादय द्विषा
मघोनां हर पापचक्षुषां २४ यन्नो भयं ग्रहेभ्योभूत्केतुभ्यो नृभ्य एव वा सरीसृपेभ्यो दंष्ट्रिभ्यो भूते

वक्रमिति स्वरूपमुक्ता संबोध्य प्राधान्ये प्रतिप्रायेन दहति कक्षं शुष्कतृणं २१ अशनिवत्स्पर्शो येषां ते विस्फुलिं
गा यस्याः तस्याः संबोधने हे गदे त्वमजितस्य प्रियासि अरे इति वा अच्युतस्य दासः अतः कूष्माण्डादीन् निष्पिंढि निष्पिंढि संचू
र्णय संचूर्णय अरीन् चूर्णय सर्वं चूर्णीकृत्य प्रतिपीडनाय २२ हे दरेन्द्र पाञ्चजन्य त्वं यातुधानादीन् विद्रावय क्षिप्रयह्नः
कृष्णपूरितः सन् भीमस्वनः अरेर्हृदयानि कम्पयन् २३ तिग्मधारा यस्य हे तिग्मधार असिवर त्वं ईशप्रयुक्तः सन् मम अरिसैन्यं छिन्धि
छिन्धि शतचन्द्राकाराणि मंडलानि यस्मिन् हे शतचन्द्र चर्मन् अघोनाम् अघवतां द्विषां चक्षूंषि छादय पापचक्षुषां

भ्योंहोभ्य एव च २५

चक्षुरादीनां चर्मेति हर २४ यत् येभ्यो भयं तेभ्यो अंहोभ्यः पापेभ्यः २५

श्री॰
भा॰ष॰
टी॰
४॰

श्रेयःप्रतीपकाः श्रेयोव्याघातकाः २६ स्तोत्राणि बृहद्रथन्तरादिसामानि तैः स्तोभ्यते संस्तूयत इति स्तोत्रस्तोभः छ-
न्दोमयो वेदमूर्तिः सुपर्णोसि गरुत्मानित्यादिश्रुतेः एकपद्यपाठे स्तोभाः गीतिसंस्कारार्थान्यक्षराणि तैः स्तोभः स्तुतिर्या
वेसामाध्यायभूतस्सकलस्तोमः २७ नामानि च रूपाणि च यानानि वाहनानि आयुधानि च नो बुद्ध्यादीन्पान्तु पार्षदभू-
षणाः पार्षदश्रेष्ठाः पान्तु २८ सदसच्च मूर्तामूर्तं यत्तत्सर्वं जगत् २९ एकात्म्यस्यानुभावो नुध्यानं येषां तेषां

सर्वाण्येतानि भगवन्नामरूपास्त्रकीर्तनात् प्रयान्तु संक्षयं सद्यो ये नः श्रेयःप्रतीपकाः २६ गरुडो
भगवान्स्तोत्रस्तोभश्छन्दोमयः प्रभुः रक्षत्वशेषकृच्छ्रेभ्यो विष्वक्सेनः स्वनामभिः २७ सर्वापद्भ्यो हरे-
र्नामरूपयानायुधानि नः बुद्धीन्द्रियमनःप्राणान्पान्तु पार्षदभूषणाः २८ यथा हि भगवानेव वस्तुतः
सदसच्च यत् सत्येनानेन नः सर्वे यान्तु नाशमुपद्रवाः २९ यथैकात्म्यानुभावानां विकल्परहितः
स्वयं भूषणायुधलिङ्गाख्या धत्ते शक्तीः स्वमायया ३० तेनैव सत्यमानेन सर्वज्ञो भगवान्हरिः पा
तु सर्वैः स्वरूपैर्नः सदा सर्वत्र सर्वगः ३१ विदिक्षु दिक्षूर्ध्वमधः समन्तादन्तर्बहिर्भगवान्नारसिंहः प्रहा
पयँल्लोकभयं स्वनेन स्वतेजसा ग्रस्तसमस्ततेजाः ३२ मघवन्निदमाख्यातं वर्म नारायणात्मकं विजे
ष्यसेञ्जसा येन दंशितोसुरयूथपान् ३३ एतद्धारयमाणस्तु यं यं पश्यति चक्षुषा पदा वा संस्पृशेत्स
द्यः साध्वसात्स विमुच्यते ३४ न कुतश्चिद्भयं तस्य विद्यां धारयतो भवेत् राजदस्युग्रहादिभ्यो व्या-
घ्रादिभ्यश्च कर्हिचित् ३५ इमां विद्यां पुरा कश्चित्कौशिको धारयन्द्विजः योगधारणया स्वाङ्गं जहौ
स मरुधन्वनि ३६

विकल्पो भेदस्तद्रहितोपि ३० सत्यमानेन सत्यभूतप्रमाणेन ३१ पुनरपि श्रीनृसिंह एव प्रार्थ्यते विदिक्ष्वि-
ति प्रहापयन्नुद्यतः महानारसिंहः प्रह्लादः स्वनेन श्रीनृसिंहनामगर्जनेन स्वतेजसा स्वप्रभावेन ग्रस्तानि समस-
स्तानि दिग्गजविग्रहास्वजलवाय्वग्न्यादीनि तेजांसि प्रभावा येन सः ३२ दंशितः कवचितः ३३ सोपि साध्वसा
द्भयात् विमुच्यते ३४ तस्य तु भयं न भवेदेव ३५ एतद्विद्याप्रभावमितिहासेनाह इमामिति सार्धैस्त्रिभिः
मरुधन्वनि निरुदके देशे अनेन विद्यया दंशतीयानेन प्रतिवेदर्शितम् ३६ ॥

प्रागुदीचीं दिशं गतः सन् सूक्ष्मो मानसं सरः प्रविष्टः १४ सहस्रं सहस्रं वर्षाणि उषित्वा नालतन्तुनालवसन् कथं भु
नः न लब्धो भोगो येन सः कुतः यतः यस्मात् इह जले वसन् अग्निर्हव्यस्य स्वयं गृहीत्वा स्वहस्तस्य हविर्भागाने
तुः जले प्रवेशासंभवात् इह लब्धभोग इत्यर्थः पाठान्तरे तु अलब्धो यज्ञभागो येन सः १५ त्रिनाकं स्वर्गं केऽचित् स्वर्ये यास्मि
न् त्रितिनाकः पुण्यश्लोकः नहुषेणाकेन स्वर्गः नन्तु मनुष्यस्य कुतः स्वर्गराज्यं तत्राह विद्यादिभिः अनुभावः स्व
र्गपालनसमर्थः यस्य सः नहि तस्मिन् सातिक इमिंद्रस्य पुनः स्वर्गप्राप्तिस्तत्राह स नहुषः संपदैश्वर्याभ्यां योमद
स्तेन नीयानु इंद्रियस्य सः इंद्रपत्न्याः शिक्षया तिरश्चां गतिं सर्पयोनिं नीतः उपायेन शापितः एवं ब्रह्मपापः नहुषः कि

नु भोगमनो दिशः सर्वाः सहस्राक्षो विशोऽपते प्रागुदीचीं दिशं प्रविष्टो नृपमानसे ४७ तस्योपरि
विमानेन गन्धर्वपतिरेकदा ययौ चित्ररथः स्त्रीभिर्वृतो यत्र द्विजक्षयः ३७ सोऽगतो न्यपतन् मूर्ध्नः स
विमानो ह्यवाक्शिराः स वालखिल्यवचनादस्थीन्यादाय विस्मितः ३८ प्रास्य प्राचीसरस्वत्यां स्ना
त्वा धाम स्वमन्वगात् ३९ श्रीशुक उवाच य इदं शृणुयात्काले यो धारयति चादृतः तं नमस्यन्ति भूता
नि मुच्यते सर्वतो भयात् ४० एतां विद्यामधिगतो विश्वरूपाच्छतक्रतुः त्रैलोक्यलक्ष्मीं बुभुजे विनि
र्जित्य मृधेऽसुरान् ४१ इति श्रीभागवते महापुराणे षष्ठस्कन्धे नारायणवर्मनामाष्टमोऽध्यायः
८ श्रीशुक उवाच तस्यासन् विश्वरूपस्य शिरांसि त्रीणि भारत सोमपीथं सुरापीथमन्नादमिति शुश्रुम

म १ ॥

यत्र द्विजस्य तस्य योगेन देहत्यागः तस्योपरि ३७ सद्यः तत्क्षणमेव गगनात् न्यपतत् पाठान्तरे वेगेन नाभिः सह वाल
खिल्यापदेशात् तस्यास्थीनि प्राचीसरस्वत्यां प्रक्षिप्य विस्मितः सन् स्वधाम गन्धर्वलोकं जगाम ३८ ३९ अधिगतः प्राप्तः स
न् ४१ इति श्रीभावार्थदीपिकायां षष्ठस्कन्धे अष्टमोऽध्यायः ८ नवमे विश्वरूपस्य हनने शक्रेण कोपतः वृत्रोत्प
त्यादि तेन वृत्रभीतैः देवैः हरेः स्तुतिः १ सोमस्य पीथं पानं यस्मिन् एवं सुरापीथम् अन्नमत्तीत्यन्नादं एवं त्रिरूपस्य विश्वरूपस्य वेदा
नुः पुरा हि वै देवानामासीदित्यादिश्रुतिरिति

मन्वया १ ॥ १ ॥

श्रीः भा॰ ष॰ टी॰ ९

तस्यास्त्वष्टुपत्न्यामसुरसंवादितिहाभ्यां प्रत्यक्षं परोक्षं यथा भवति तथा सर्वेभ्यो देवेभ्यो हविर्भागं इन्द्रायेदं अग्नय इदमि
त्युच्चैरवदत् अप्रत्यक्षेतः यस्य पितरो देवाः सः २ असुरेभ्यस्तु परोक्षमेभागं ददातीत्याह देवान्यजमानोऽसावसु
रस्य तिभागमावहत् तस्याविशयितमसमर्थः तथापि न प्रवृत्त ४ संवत्सरेण घोरं स्थित्वा संवत्सरान्ते भूताक्रोशभीतः स
र्वभूतानां मध्ये विशुद्धये लोकापवादभयाद्धा यद्यपि हरिरिन्द्रो भूम्यादिभ्यस्तदघं विभज्य ददौ ६ तुरीयं चतुर्थभा
गं खातस्य गर्तस्य पूरः पूरणं तेन वरेण यदि खातं पूर्यते तर्हि पूर्वमेव भविष्यतीति तर्हि गृहीष्यामीत्येवंभाषा बुद्ध्या ततश्च ग्र
हेत्यर्थः ईरिणमूषरं श्वेतपत्तोषरेध्यपनादिनिषिद्धं ७ छेदमति पुनर्विरोहः प्ररोहो भवत्विति वरेण नियास

स वै बर्हिषि देवेभ्यो भागं प्रत्यक्षमुच्चकैः अददद्यस्य पितरो देवाः सप्रश्रयं नृप २ स एव हि ददौ भागं
परोक्षमसुरान्प्रति यजमानोऽवहद्भागं मातृस्नेहवशानुगः ३ तद्देवहेलनं तस्य धर्मालीकं सुरे
श्वरः आलक्ष्य तरसा भीतस्तच्छीर्षाण्यच्छिनद्रुषा ४ सोमपीथं तु यत्तस्य शिर आसीत्कपिञ्जलः
कलविङ्कः सुरापीथमन्नादं यत्स तित्तिरिः ब्रह्महत्यामञ्जलिना जग्राह यदपीश्वरः ५ संवत्सरान्ते
तदघं भूतानां स विशुद्धये भूम्यम्बुद्रुमयोषिद्भ्यश्चतुर्धा व्यभजद्धरिः ६ भूमिस्तुरीयं जग्राह खातपू
रवरेण वै ईरिणं ब्रह्महत्याया रूपं भूमौ प्रदृश्यते ७ तुर्यं छेदविरोहेण वरेण जगृहुर्द्रुमाः तेषां षष्ठः
निर्यासरूपेण ब्रह्महत्या प्रदृश्यते ८ शश्वत्कामवरेणांहस्तुरीयं जगृहुः स्त्रियः रजोरूपेण तास्वं
हो मासि मासि प्रदृश्यते ९ द्रव्यभूयोवरेणापस्तुरीयं जगृहुर्मलं तासु बुद्बुदफेनाभ्यां दृष्टं तद्
रूपेण ब्रह्महत्या यस्या दृष्टा निर्यासो न भक्ष्यः ८ शश्वत्कामवरेण यावृतु समये गर्भानुपघातेनैव संभोगवरेण य
त एव रजोदर्शनेन तत्संगादि न कार्यं ९ द्रव्यभूयोवरेण यस्मिन्द्रव्ये नीरसंगा आपो मिश्रा भवेयुः तस्य भूमाधिक्यं स्या
दिति वरेण यद्वा सस्य वनिकरोतु माविनाभूयस्त्ववरेण द्रव्यभूय इति पाठे अयमेवार्थः यद्वा द्रव्यभूयस्त्वमा
त्मिकं द्रव्यं वर्तते न वरेणास्य विभागस्य विश्वरूपो वधार्हः अस्यस्याप्कृतानुके तद्विभागफलमाह तत्पापं हर
ति निराकरोति क्रियः स्नपन बुद्बुदादि जलाद्बहिः प्रक्षिप्य त्यजेदित्यर्थः यद्वा दीपवज्जलं पापं हरति शुद्धि भवतीत्यर्थः
अथवा तस्माद्दापो न परिवर्ज्या इत्यादि स्कन्धार्थे पाठान्तरे हरिः किल्बिषं दुष्पापम् १०

इंद्रायेंद्रं हंतुं शत्रवे वेणभूतत्वेन तदाह इंद्रशत्रो विवर्धस्वेति अत्र चेंद्रशत्रुपदस्याद्युदात्तत्वात् बहुव्रीहौ प्रकृ
त्या पूर्वपदमिति स्वरेण बहुव्रीहिः लक्षणापन्ना इंद्रस्य वनस्य शत्रुरभूत् तदुक्तं श्रुत्या इंद्रश्चवीत् स्वाहेंद्रशत्रो
वर्धस्वेति तस्मादस्येंद्रः शत्रुरभवत् इति तथा च शिक्षायां मंत्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थ
माह स वाग्वज्रो यजमानं हिनस्ति यथेंद्रशत्रुः स्वरतोपराधादिति ११ अन्वाहार्यपचनात् दक्षिणाग्नेः १२
तेवीक्ष्य वित्रस्ता लोका दिशो विद्रुता इति पंचमेनान्वयः कथंभूतं विषक् समंततः इषुविक्षेपमात्रं प्रतिदिनं वर्ध
मानं दग्धशैलप्रतीकाशं ह्यस्तवर्णसंध्याभ्रानीकवर्गीषीभिर्येस्यतं १३ तप्तताम्रवत् शिखाः श्मश्रूणि च यस्य

हतपुत्रस्ततस्त्वष्टा जुहावेंद्राय शत्रवे इंद्रशत्रो विवर्धस्व माचिरं जहि विद्विषं ११ अथान्वाहार्यपच
नादुत्थितो घोरदर्शनः कृतांत इव लोकानां युगांतसमये यथा १२ विष्वग्विवर्धमानं तमिषुमात्रं
दिने दिने दग्धशैलप्रतीकाशं संध्याभ्रानीकवर्चसम् १३ तप्तताम्रशिखाश्मश्रुं मध्याह्नार्कोग्र
लोचनम् देदीप्यमाने त्रिशिखे शूल आरोप्य रोदसी नृत्यंतमुन्नदंतं च चालयंतं पदा महीं १४ द
रीगंभीरवक्त्रेण पिबता च नभस्तलं लिहता जिह्वयर्क्षाणि ग्रसता भुवनत्रयम् १५ महता रौद्र
दंष्ट्रेण जृंभमाणं मुहुर्मुहुः वित्रस्ता दुद्रुवुर्लोका वीक्ष्य सर्वे दिशो दश १६ येनावृता इमे लो
कास्तपसा त्वाष्ट्रमूर्तिना स वै वृत्र इति प्रोक्तः पापः परमदारुणः १७ तं निजघ्नुरभिद्रुत्य सगणा
विबुधर्षभाः स्वैः स्वैर्दिव्यास्त्रशस्त्रौघैः सोग्रसत्तानि कृत्स्नशः १८ ततस्ते विस्मिताः सर्वे विष
ण्णा ग्रस्ततेजसः प्रत्यंचमादिपुरुषमुपतस्थुः समाहिताः १९ देवा ऊचुः वाय्वंबराग्न्यप्क्षित

थं ह्रान्तार्कवदुग्रे लोचने यस्य १४ रोदसी आरोप्य वर्तमानः १५ दरीवत् गंभीरेण वक्त्रेण मुहुर्मुहुर्जृंभमाणमित्य
न्वयः कथंभूतेन नभस्तलं पिबता ऋक्षाणि जिह्वया लिहता भुवनत्रयं ग्रसता १६ महती विस्तीर्णा रौद्रा दंष्ट्रा
यस्मिन् १७ वृत्रनाम निर्वक्ति येनावृता इति त्वाष्ट्री मूर्तिर्यस्य तपसः तेन तथा च श्रुतिः स इमांल्लोकानावृणोत् तद्
वृत्रस्य वृत्रत्वमिति १८ अग्रसत् भक्षितवान् १९ ग्रस्तं तेजो येषां प्रत्यंचमंतर्यामिणं त्रिभुवनस्य तेन व्याप्तत्वात् क्वा
पि गमनासंभवात् अंतर्वेव स्थितात् पुरुषात् महाभये परित्राणमन्यतो न भवेदिति हरिमेव प्रपद्यंते सर्वे शरणमात्मनः ॥

वाय्वग्न्यादीनि पंचमहाभूतानि तैर्निर्मितास्त्रयो लोकास्तेषामधिपतयो ब्रह्मादयस्तत्र ततो वाय्वादीनां च पंच सर्वेऽपि यस्मै भयेन काल यवालाद्विजिंतः संतो बलिं हराम अस्मावपि यस्माद्बिभेति ततः परमेश्वरादेवास्माकं शरणं रक्षणमस्तु २१ तत एवं स्वव्यवहारेण हेतुमाह अविस्मितं निरहंकारं कुतः हलन्यूनत्वं वा कुतः प्रशान्तं रागादिशून्यं नच द्युक्तः स्वेनैव लाभे न परिपूर्णकामं नच कुतः समं उपाधिपरिच्छेदशून्यं एवंभूतं परमेश्वरं विना अपरं यः शरणार्थमुपसर्पति स हि बालिशोऽज्ञः यतोऽसौ श्वलांगूलेन उडुकेन समुद्रमतितितर्त्ति अतितरितुमिच्छतीत्यर्थः यथा तेन समुद्रतरणं न भवति तथान्येश्वराश्रयणेन संसारार्णवतरणं भवतीति भावः मत्स्यभगवानेव पार्यवरक्षक इति दृष्टमित्याह यस्येति द्वाभ्यां यस्य मत्स्यस्य शृंगे जगतीं पृथ्वीमेव स्वनावं बद्ध्वा मनुः सत्यव्रतो यथावत् दुर्गसंकटं ततार स एव वारिचरो मत्स्य

अविस्मितं तं परिपूर्णकामं स्वेनैव लाभेन समं प्रशान्तं विनोपसर्पत्यपरं हि बालिशः श्वलांगुलेनातितितर्त्ति सिंधुं २२ यस्योरुशृंगे जगतीं स्वनावं मनुर्यथाबध्य ततार दुर्गं स एव नस्त्वाष्ट्रभयाद्दुरंतात् त्राताश्रितान्वारिचरोऽपि नूनं २३ पुरा स्वयंभूरपि संयमांभस्युदीर्णवातोर्मिरवैः कराले एकोऽरविंदात्पतितस्ततार तस्माद्भयाद्येन स नोऽस्तु पारः २४ य एक ईशो निजमायया नः ससर्ज येनानुसृजाम विश्वं वयं न यस्यापि पुरः समीहतः पश्याम लिंगं पृथगीशमानिनः २५ यो नः सपत्नैर्भृशमर्द्यमानान्देवर्षितिर्यङ्नृषु नित्य एव कृतावतारस्तनुभिः स्वमायया कृत्वात्मसात्पाति युगे युगे च

मूर्तिर्नोऽस्मानाश्रितान् स नः नूनं त्राता भविष्यति २३ संयमांभसि प्रलयोदके उदीर्णैः उत्कटैः वातैः ऊर्मयस्तेषां रवैः कराले भयंकरे अरविंदात् नाभिकमलात् पतितः प्रायः एकः असहाय एव तस्मात् भयाद्येन ततार स एव नः पारस्तारकोऽस्तु २४ किं च भयेन भवेन स्रष्टारः पालितारश्च वयं अत एवमेव वरोऽनुसृजामेत्याह य एक इति त्रिभिः येनानुगृहीताः संतो विश्वं सृजामः न तु स्वयमेव स्रष्टारः नाप्यस्माकमनुग्राहकोऽस्तीति तस्यादर्शनान्तरमाह अस्मत्तः पुरः एवमेव चेष्टमानस्यापि यस्य लिंगं रूपं न पश्याम न तु हेतुः पृथगीशा इत्यभिमानिनः २५ देवादिषु उपेन्द्रपरशुराममत्स्यरामादितनुभिः कृतावतारः सन् आत्मसात्कृत्वा पाति च २६ ॥

आत्मभूतं दैवतं तु नः विश्वं विश्वात्मकेनयापि विकारं वारयति अन्येविश्वात्मकत्वेहेतुः परं कारणं नतुप्रधा
नं पुरुषश्चविश्वस्यकारणं नत्वाह' प्रधानं पुरुषंच नदात्मकोपि सएवेत्यर्थः सएवनः शंविधास्यति २७ प्रती
च्यां दिशि हरिः प्रथममाविरभूत् पश्चात्तु तेषां पुरो दृष्टश्चेक्षणाह्लादेन विवशाश्च बभूवुः दंडवत्पतिताः सन्तः शनैरु
त्थाय तुष्टुवुरित्यन्वयः २८ तं कीदृशं श्रीवत्सकौस्तुभौ विनात्मतुल्यैः षोडशभिः सुनन्दादिभिः परितः सेवि
तं उन्निद्रं शारदं पुरुहुतं दीक्षणं यस्य तं २९ ३० यज्ञो वीर्यं स्वर्गादिफलजननाय सामर्थ्यं यस्य तस्मैनमः वयसा
उत कालात्मने फलपरिच्छेदकाय त्रिकालात्मने पिनमः हि यातं वैशब्दः अस्तं प्रक्षिप्तं चक्रं येन पूर्वं भूतेः शत्रुभावैः सुपुरुहूतयो

तमेव देवा वयमात्मदैवतं परं प्रधानं पुरुषं विश्वमन्यम् व्रजाम सर्वे शरणं शरण्यं स्वानां सनोधा
स्यति शं महात्मा २७ शुक उवाच इति तेषां महाराज सुराणामुपतिष्ठताम् प्रतीच्यां दिश्यभूदा
विः शंखचक्रगदाधरः २८ आत्मतुल्यैः षोडशभिर्विना श्रीवत्सकौस्तुभौ पर्युपासितमुन्निद्र
शरदम्बुरुहेक्षणम् २९ दृष्ट्वा तमवनौ सर्व ईक्षणाह्लादविक्लवाः दंडवत्पतिता राजञ्छनैरु
त्थाय तुष्टुवुः ३० देवा ऊचुः नमस्ते यज्ञवीर्याय वयसे उत ते नमः नमस्ते ह्यस्तचक्राय नमः सु
पुरुहूतये ३१ यत्ते गतीनां तिसृणामीशितुः परमं पदं नार्वाचीनो विसर्गस्य धातर्वेदितुमर्हति
३२ ओं नमस्तेस्तु भगवन्नारायण वासुदेवादिपुरुष महापुरुष महानुभाव परममंगल परमकल्या
ण परमकारुणिक केवल जगदाधार लोकैकनाथ सर्वेश्वर लक्ष्मीनाथ परमहंसपरिव्राजकैः
परमेणात्मयोगसमाधिना परिभावितपरिस्फुटपारमहंस्यधर्मेणोद्घाटिततमः कपाटद्वारे चित्तेपा

रणीभत्त्वद्भुतात्रे ३१ नतु मम गुणातीतं रूपं विहाय गुणोपाधिकं यज्ञवीर्यत्वादिकमितिवर्णनेन त्वाह यत्तु गुण
त्रयस्येशितुर्निर्गुणं निर्गुणात्मिकानां तिसृणां गतीनां परमं पदं निर्गुणं स्वरूपं तत्व विसर्गस्यार्वाचीन इदानींतनः हे
सिद्धेशाश्चरंति ज्ञानहेतवः १५ तस्माद्युवां ग्राम्यपशोर्मम मूढधियः प्रभू अंधे तमसि मग्नस्य ज्ञा
नदीप उदीर्यतां १६ अंगिरा उवाच अहं ते पुत्रकामस्य पुत्रदोस्म्यंगिरा नृप एष ब्रह्मसुतः साक्षान्ना
रदो भगवानृषिः १७ इत्थं त्वां पुत्रशोकेन मग्नं तमसि दुस्तरे अतदर्हमनुस्मृत्य महापुरुषगोचरं १८

व्यक्तिर्विशेषः एतौ विभागौ यथा वस्तुनि संमात्रे कल्पितौ परस्परापेक्षसिद्धत्वेनातिरूपत्वात् तद्वत् ८
आधिना म्लानं वक्त्रं ९ १० उन्मत्तस्येव लिंगं येषां ते ११ १५ मम पशुरस्य को बोधे समर्थाविति वा अतो युवाभ्यां

नदीपः प्रवर्तितो १९ महापुरुषगोचरं हरिभक्तं १८ ॥

श्री० भा० ष० टी० ३५

१९ तदैव यदा पूर्वमागतोस्मि २० रायश्चार्थाः २१ चलाश्चानित्याः किंच महीति २२ हे शूरसेन इमे च सर्वेपि विशो
कादिप्रदाः किंचागमापायित्वेन गंधर्वनगरतुल्या गंधर्वनगरं हि कस्माच्चित्कदाचिदयाति चायाति चेति प्रसिद्धं
तद्वदनित्यत्वे शोकादिहेतुत्वे चागमापायित्वे चोक्ते मिथ्यात्वमप्याह स्वप्नश्च मायाच मनोरथश्च यथा तद्वत्
२३ मनोभवाः मनोमात्रविजृंभिताश्च हेतुः अर्थेन तात्विकस्वरूपेण विनैव दृश्यमानाः न तु कुतः यस्मात् द्र
ष्ट्रंतरेण दृश्यन्ते नास्तिकत्वे हि द्रष्ट्रंतरेणाबाधो न स्यात् अतो मनोमात्रविजृंभितत्वेन स्वप्नादिवन्मिथ्याभूता इत्य
र्थः नन्वेते पुण्यापुण्यकृता इति मीमांसकाः प्राहुस्तत्राह मनोभवत्वे तत्राह कर्मभिः कर्मवासनाभिः कर्माण्यर्था

अनुग्रहाय भवतः प्राप्तावावामिह प्रभो ब्रह्मण्यो भगवद्भक्तो नावसीदितुमर्हसि १८ तदैव ते परं
ज्ञानं ददामि गृहमागतः ज्ञात्वान्याभिनिवेशं ते पुत्रमेव ददाम्यहम् २० अधुना पुत्रिणां तापो भवतैवानु
भूयते एवं दारा गृहा रायो विविधैश्वर्यसंपदः २१ शब्दादयश्च विषयाश्चला राज्यविभूतयः महीरा
ज्यं बलं कोशो भृत्यामात्याः सुहृज्जनाः २२ सर्वेपि शूरसेनेमे शोकमोहभयार्तिदाः गंधर्वनगरप्रख्याः
स्वप्नमायामनोरथाः २३ दृश्यमाना विनार्थेन न दृश्यन्ते मनोभवाः कर्मभिर्ध्यायतो नानाकर्माणि
मनसोभवन् २४ अयं हि देहिनो देहो द्रव्यविज्ञानक्रियात्मकः देहिनो विविधक्लेशसंतापकृदुदा
हृतः २५ तस्मात्स्वस्थेन मनसा विमृश्य गतिमात्मनः द्वैते ध्रुवार्थविश्रंभं त्यजोपशममाविश
२६ नारद उवाच एतां मंत्रोपनिषदं प्रतीच्छ प्रयतो मम यां धारयन्सप्तरात्राद्द्रष्टासि संकर्षणं प्रभुः २७

नच ध्यायतः पुंसो मनस एव निमित्तात् कर्माण्यभवन् पाठांतरे कर्म ईप्सितं ममाभिध्यायत इत्यर्थः कर्मणोपि म
नोभवत्वात् तत्साध्यान्यपि मनोभवान्येवेति भावः २४ तदेवं ममतास्पदानां दुःखादिहेतुत्वमुक्त्वा देहस्य तथो
क्तमित्याह अयं हीति हीत्यवधारणे अयं द्रव्यज्ञानक्रियात्मकः अधिभूताधिदैवाध्यात्मरूपो देह एव देहि
नो देहोहमिति मन्यमानस्य देहिनो जीवस्य विविधान् क्लेशान् संतापांश्च करोतीति तथा २५ स्वस्थेनाव्य
ग्रेण मतिं तत्वं ध्रुवोयमर्थ इति विश्रंभं विश्वासं त्यज एवात्मजनतत्त्वं उपशममाविश आश्रय २६ अंगिरसोपदिष्टं न
तु परमेश्वरप्रसादं विना न प्राप्यत इति तत्प्रसादाय मंत्रविद्यां नारदो दित्सति एतामिति उपनिषदं परं श्रेयो यस्यामित्युपनि

राम
३५

अतुलंवनन्यनधिकंच समानाधिकशून्यंपरमहिमानंप्राप्नुपैष्यति २८ इति भावा षष्ठ पंचद शो
ध्यायः १५ षोडशेतनस्वनीतेजीवबशोकीकृतनेनृपे श्रादिदेशमहाविद्यांनारदः शोषतोषणी श्रादौतावत्
तस्यखैनैवपितृपुत्रादिसंबंधोनास्तीतिदर्शयितुंयोगबलेनतमेवज्ञातीनांदर्शयित्वाजीवान्स्तंत्रिमाद्युवाच २
शेषमविशिष्टमायुरस्तिअनयुभुस्वनाभुनन्त्वादित्यर्थः नदेवकलेवरंप्रविविष्टेनास्थितोजीवउवाच यस्मात्तत्र
लेष्वेतशरीरंस्थितेनतिरश्चेय ३ ४ मयिभुतेपुत्रदृष्याग्शोकवेत्त भातुरदृष्याहर्षः किंनक्रियतइत्याशयेनवसंबं
धस्यानियतत्वमाह बंधवोविवाहाद्युषिभिः संबंधिनः ज्ञातयः सपिंडाः अरयोः घातकाः मित्राणिरक्षकाः

यस्यादमूलमुपसन्ननरेंद्रपूर्वेश्र्वीर्दयोभ्रममिमंहितर्यविसृज्य सद्यस्तदीयमतलानधिकंमा
हित्वंप्राप्तुर्भवाननपिपरेनविसादुपैति २८ इति भाग नेष संधे वद ध्यायः १५ श्र
बाउवाच अथदेवऋषीराजन्संपरेतेनृपात्मजे दर्शयित्वेतिहोवाचज्ञातीनामनुशोचतां १ ना
रद उवाच जीवात्मनपश्यभद्रंतेमातरंपितरंचते सुहृदोबांधवास्तप्ताःशुचात्वत्कृतयाभृ
शं २ कलेवरंस्वमाविश्यशेषमायुःसुहृद्वृतः भुंक्ष्वभोगानपितृप्रत्तानधितिष्ठनृपासनं
३ जीवउवाच कस्मिंजन्मन्यमीमह्यंपितरोमातरोभवन् कर्मभिर्भ्राम्यमाणस्यदेवतिर्यंनृ
योनिषु ४ बंधुज्ञात्यरिमध्यस्थमित्रोदासीनविद्विषः सर्वएवहिसर्वेषांभवंतिक्रमशोमिथः
५ यथावस्तूनिपण्यानिहेमादीनिततस्ततः पर्यटंतिनरेष्वेवंजीवोयोनिषुकर्तृषु ६ ९ नि
त्यस्यार्थस्यसंबंधोह्यनित्योदृश्यतेनृषु यावद्यस्यहिसंबंधोममत्वंतावदेवहि ७ ॥ ॥

मध्यस्थाउभयव्यतिरिक्ताः साधारणाविद्विषोऽइत्यादिनिमित्तेनद्वेषिणः उदासीनास्तत्यानिरिक्ता इति
भेदः ५ कर्मभिर्भ्राम्यमाणत्वेदृष्टांतः यथावस्तूनिपण्यानिक्रियाद्यर्हाणिकर्तृषुव्यवहर्तृषुपरिभ्रमं
ति एवंजीवोपियोनिषुजनकेषु ६ एकस्मिन्नपिजन्मनिसंबंधस्यानियतत्वंसदृष्टांतमाहद्वाभ्यां नित्य
स्यजीवनोपिअर्थस्यपदार्थः अनित्यःअनियतः विक्रियादिनासंबंधनिवृत्तेः ७ ॥ ॥

श्री॰
भा॰ ष॰
टी॰
३६

एवं योनिगतः पित्रादिसंबंधं प्राप्तोपि स जीवो नित्यः देहजन्मादिना तस्य जन्माद्यभावात् अत एव वस्तुतो निर
हंकृतः अहमस्य पुत्र इत्यभिमानशून्यः यत्र पित्रादौ संबंधिभिर्यावदुपलभ्येत कर्मवशेन वर्त्तेत तावदेव तस्यापि
त्रादीन् तस्मिन् सत्त्वं न तु विक्रियायाम् परकालमपि अथ एवं संबंधः यदन्यं कलेवरं समाविश्यति तत्र तस्मिन् कले
वरे मे इदानीं स्वत्वं निवृत्तमित्यर्थः इति सदृष्टान्तमाह नित्यस्याचिरकालावस्थायिनः स्वर्णादेः योनिगतो देहं प्रविष्टः य
त्र देहे तस्य जीवस्य न तु तस्मिन् देहे स्वत्वेन तु मरणोत्तरकालमपीत्यर्थः ८ जीवस्य नित्यत्वं साधयति एष नित्य
त्वे हेतुः अव्ययः अपक्षयशून्यः तत्र हेतुः सूक्ष्मः जन्मादिशून्यः तत्र हेतुः सर्वाश्रयः जन्मादिमतो देहादेराश्रयः
न तु देहादिरूपः यतः स्वदृक् स्वप्रकाशः सर्वाश्रयत्वमुपपादयति आत्ममायागुणैरात्मानमेव विश्वविसृजन् सृजते स

एवं योनिगतो जीवः स नित्यो निरहंकृतः यावद्यत्रोपलभ्येत तावत्स्वत्वं हि तस्य तत् ८ एष नि
त्योऽव्ययः सूक्ष्म एष सर्वाश्रयः स्वदृक् आत्ममायागुणैर्विश्वमात्मानं सृजते प्रभुः ९ न ह्यस्यास्ति प्रि
यः कश्चिन्नाप्रियः स्वः परोपि वा एकः सर्वधियां द्रष्टा कर्तॄणां गुणदोषयोः १० नादत्त आत्मा हि गु
णं न दोषं न क्रियाफलं उदासीनवदासीनः परावरदृगीश्वरः ११ श्रीबादरायणिरुवाच इत्युदीर्य गतो जीवो
ज्ञातयस्तस्य ते तदा विस्मिता मुमुचुः शोकं छित्त्वात्मस्नेहशृंखलां १२ निर्हृत्य ज्ञातयो ज्ञाते
र्देहं कृत्वोचिताः क्रियाः तत्यजुर्दुस्त्यजं स्नेहं शोकमोहभयार्त्तिदं १३ ॥ ॥

जति न त्वात्मानं स्वयमनहंकृतत्वेतिश्रुतेः उपादानकारणत्वात् सर्वाश्रय इत्यर्थः जीवस्य वस्तुतो ब्रह्मत्वात् तद्रू
पेण एवं चिच्छक्तिविशिष्टस्येश्वरत्वेन सृष्टृत्वात् जीवः सृजतीति वाचोयुक्तिः यद्वा स्वकर्मद्वारा सृष्टिनिमित्त
त्वेन सृष्टृत्वं भोग्यस्य च सर्वभोक्त्राश्रयत्वात् सर्वाश्रयत्वं चोक्तमिति द्रष्टव्यं ९ यदुक्तं सुहृद्दुहृत् इति सुहृदो
वाथवा स्वमा इति तद्व्याहतमहास्येति तत्र हेतुः एकः सुहृदादिसंगरहितः तत्र हेतुः गुणदोषयोर्हिताहितयोः
कर्तॄणां मित्रादीनां याः सर्वा धियः वृत्तयस्तासां द्रष्टा साक्षी १० यच्चोक्तं भोक्ता भोगानित्यादि तत्राह
नादत्त इति गुणं सुखं दोषं दुःखं क्रियाफलं च राज्यादिकं उदासीनत्वे हेतुः परावरदृक् कारणस्य कार्यस्य च साक्षी
न तु भोक्ता यतः ईश्वरः देहादिपारतंत्र्यशून्यः अत एवं भूतस्य मम च युष्माकं च संबंधाभावात् शोकं माकुरुतेति वा

रामः
३६

तंवृहेमात्वंस्मरंतः ब्रवाणमनाप्नुन्यानिस्ताः समह इतिभावः १४
द्विजभाषितं द्विरिरसाप्रोक्तं पुत्रादीनां वृहंखंवृहेमात्वंस्मरंतः सरसः पंकात्
निविडपंकात्स्यशृंहं विहायनिः क्रमणमभे धीरस्य तस्यैव योग्यं नान्यस्यतसद्दृष्टान्तमाह सरसः पंकात्
हियोगजइवेति १५ कृतः पुण्यजलक्रियः पितृतर्पणाद्यायेन सयतप्राणा नियतेंद्रियः १६ ममोधीम
हिध्यायेममनसानमस्यामहत्यर्थः १८ निवृत्तंद्वैतदृष्टिर्यस्मात् १९ निरस्तानिरस्ताः शक्त्यूर्मयः मायानि
मितारागद्वेषादयोयेन २० मनसासहवचसिअप्राप्योपरतेमतियथवकप्रवप्रकाशतीवरमीतिसर्वेंद्रियोप
लक्षणं सोस्मानव्यात् सदसत्परः कार्यकारणयोः कारणं २१ नदेवाहयस्मिन्निदंकार्यकारणंनिवृत्तिश्च

बालहत्याहतप्रभाः बालहत्याधनेचेरुब्रह्मपौर्यत्निहूपिते १४ यमुना
यांमहाराजस्मरंतोद्विजभाषितं सस्तं संप्रतिबुद्धात्माविवेकैर्द्विजोत्तमिभिः गृहंद्यंधकूपान्निर
ष्क्रांताः सरःपंकादिवद्विपः १५ कालिंद्यांविधिवत्स्नात्वाकृतपुण्यजलक्रियः मौनेनसंयत
प्राणोब्रह्मपुत्रावववंदत १६ अथतस्मैप्रपन्नायभक्तायप्रयतात्मने भगवान्नारदःप्रीतोविद्या
मेतामुवाचह १७ नमस्तुभ्यंभगवतेवासुदेवायधीमहि प्रद्युम्नायानिरुद्धायनमःसंकर्षणाय
च १८ नमोविज्ञानमात्रायपरमानंदमूर्तये आत्मारामायशांतायनिवृत्तद्वैतदृष्टये १९ आत्मा
नंदानुभूत्यैवन्यस्तशक्त्यूर्मयेनमः हृषीकेशायमहतेनमस्तेनंतमूर्तये २० वचस्युपरतेऽप्राप्यय
एकोमनसासह अनामरूपश्चिन्मात्रःसोव्यान्नःसदसत्परः २१ यस्मिन्निदंयतश्चेदंतिष्ठत्यप्येतिजा
यते मृण्मयेष्विवमृज्जातिस्तस्मैतेब्रह्मणेनमः २२ यन्नस्पृशंतिनविदुर्मनोबुद्धींद्रियासवः अंतर्ब
हिश्चविततंव्योमवत्तन्नतोस्म्यहं २३ देहेंद्रियप्राणमनोधियोमीयदंशविद्धाःप्रचरंतिकर्मसु नै

द्रव्यांतरं यस्मिन्सत्तेयत् नसैव २२ नतुसर्वा
श्रयेतिवचनस्य जायतेमृण्मयेषुघटावटादिषुमृज्जातिमृत्वादमिवसर्वानुस्यूतेयत् नमे २२ ततसर्वा
नुस्यूतवेत् जातिविज्ञप्तीयेनकथंमनोवचसामगम्यमित्यत आह यद्ब्रह्मव्योमवद्विभानमपिप्रसवःप्राणादि
याष्टान्यानस्पृशंतिमनआदीनि वर्तंतियथायथतममलोहेनदहति अतोयथालोहमग्निशक्त्यैवदाहकसदग्नि
विनानदहति एवंब्रह्मगतज्ञानक्रियाशक्तिमात्रवर्तमानादेहयदस्तत्रस्पृशंतिनविदुरिति भावः जीवस्त

हिंदृष्टान्त्वाज्ज्ञानानन्तेस्वात् स्थानेषुजाग्रदादिषु दृष्टृपदेशं दृष्टृसंज्ञातदेवैतिशमोतिनान्योजीवानामात्
त्मिनान्योतोस्ति इष्टेत्यादिश्रुतेः यद्वा दृष्टृपदेशं दृष्टृमेतंजीवमपितदेवपतिर्जानाति नतुजीवस्तत्‌ जा
नातीत्यर्थः तदुक्तं सेद्धहंसगुरुवत्तोवे देहोसवोद्धार इत्यादि २४ सकलायेसाम्नतपरिहृष्टाखेषानिकरः
समूहकलस्यकरकमलानां कुंमलेकुपलालितेचरणारविंदयुगलंयस्यतस्यसंबोधने परमउत्कृष्टपरमेष्ठि
न सर्वेश्वर पूर्वसनादशैगिरा प्राजगामेत्याथिराः प्राधान्येनोक्तः चित्रकेतोः पुत्रशृहत्वेनतस्यपृथग्गृहत्वात्‌
इहत्वनास्यांगिरसासाकं यथाविनिनारदस्यप्राधान्यनिर्देशः तदुपदेशेनतस्यवैराग्यात्तत्रैः प्रभो इंसम
२४ यथायथावुद्धारयामास २८ विद्याधराधिपत्येवावांताफलंलभे अप्रतिहतमस्वलिते २० कतिपर

ॐनमोभगवतेमहापुरुषायमहानुभावायमहाविभूतिपतयेसकलसात्वतपरिवृढनिकरकरकम
लकुंमलोपालालितचरणारविंदयुगलपरमपरमेष्ठिन्नमस्ते २४ शुकउवाच भक्तायैतांप्रपन्नाय वि
द्यामादिश्यनारदः ययावंगिरसासाकं धामस्वायंभुवंप्रभोः २५ चित्रकेतुस्तुतांविद्यांयथानारदभा
षितां धारयामाससप्ताहादब्भक्षः सुसमाहितः २६ ततस्सप्तरात्रेणविद्यया धार्यमाणया
विद्याधराधिपत्यंसलेभेप्रतिहतं नृप २७ ततः कतिपयाहोभिर्विद्ययेद्धमनोगतिः जगामदेवदेवस्य
शेषस्य चरणांतिके २८ मृणालगौरंशितिवाससं स्फुरत्किरीटकेयूरकटित्रकंकणं प्रसन्नवक्त्रा
रुणलोचनांवृतं ददर्शसिद्धेश्वरमंडलैः प्रभुः २९ तद्दर्शनध्वस्तसमस्तकिल्बिषः स्वस्थामलांतःकर
णोभ्ययान्मुनिः प्रवृद्धभक्त्याप्रणयास्रलोचनः प्रहृष्टरोमानमदादिपूरुषं ३० सउत्तमश्लोकपदा

याहोभिः विद्ययाइद्धेनदीप्तेनमनसागतिर्यस्य २७ २८ दृष्ट्वातमादिपुरुषमभ्ययाद्धरणांगतः अनमत्‌ वनामक
एतभूतः तस्यदर्शनेनध्वस्तं समस्तंकिल्विषंयस्यसस्वच्छममलंचांतःकरणंयस्यप्रणयेनास्रयुक्तेलोचनेयस्यप्रवृद्ध
ष्टानिरोमाणियस्यसः ३० तेप्रसमीडितुंचिरंनैवाशकत्‌ नशशाक। तत्रहेतुः उत्तमश्लोकस्यपादाब्जयो
र्विष्टरमासनंउपमेहयन्‌ अभिषिंचन्‌ प्रेम्णाउपरुद्धः अखिलानांवर्णानांनिर्गमउच्चारणंयस्यसः ३१ मनी
षयाउद्यामनः समाधायपतद्वद्वाग्गाणांवभाषे यतितथावाग्भेवनसानतथाशास्त्राणांविग्रहोयस्यतं ३२

मनीषया बुद्ध्या मनः समाधाय एतद्बभाषे प्रतिलब्धवागेन सात्वतं शास्त्रं विग्रहो यस्य तं ३२
मनोसाप्रेमज्ञानेर्दनिभृतांस्वामित्सेवकान् अभिनंदन् अहासौ निरस्ताभिः पंचभिर्विभुं हे अजित स्वैरजितो
पि भवान् साधुभिर्भक्तैर्जितः स्वाधीन इव कृतः यतो भवानतिकरुणः तेपि निष्कामा भक्तास्तेपि भवता ये भवान
कामात्मनामात्मनामेव ददाति ३३ तव भक्तैरेव जित इति कथं स्पर्धंते पृथगभिमत्या जगत उदयादीनि तवैव वि
भवः विभवनं महिमा लीलेति यावत् आदिशब्देन शेषादिनियमादीनि विश्वसृजस्त्वंशांशा यत्वे ते स्पृसः किंत्वनेन दे
शीयः अस्मात् तत्र सांशांशत्वं पूर्वं स्थितेपि तत्र पृथगीश्वरा वयमित्यभिमानेन मृषैव स्पर्धंते ३४ त्वमेव ह्यादि

ततः समाधाय मनो मनीषया बभाषएतत्प्रतिलब्धवागसौ नियम्य सर्वेंद्रियबाह्यवर्तनं जगद्गुरुं सा
त्वतशास्त्रविग्रहं ३२ चित्रकेतुरुवाच अजित जितः सममतिभिः साधुभिर्भवान् जितात्मभिर्भवता
विजितास्तेपि च भजतामकामात्मनां य आत्मदोतिकरुणः ३३ तव विभवः खलु भगवन् जगदुदय
स्थितिलयादीनि विश्वसृजस्तेंशांशास्तत्र मृषा स्पर्धंति पृथगभिमत्या ३४ परमाणुपरममह
तोस्त्वमाद्यंतांतरवर्ती त्रयविधुरः आदावंते च सत्वानां यद्ध्रुवं तदेवांतरालेपि ३५ क्षित्यादिभि
रेष किलावृतः सप्तभिः दशगुणोत्तरैरंडकोशः यत्र पतत्यणुकल्पः सहांडकोटिभिस्तदनंतः ३६
विषयतृषो नरपशवो य उपासते विभूतीर्न परं त्वां तेषामाशिष ईश तदनु विनश्यंति यथा राजकु
लम् ३७ कामधियस्त्वयि रचिता न परम रोहंति यथा करंभबीजा ज्ञानात्मन्यगुणमये गुणग
णतोस्य द्वंद्वजालानि ३८ जितमजित तदा भवता यदाह भागवतं धर्ममनवद्यं निष्किंचना ये मुनय

वर्तते तदुपपादयति परमाणोः सूक्ष्मस्थूलकारणे परममहत् अंतिमकार्ये तयोस्त्वमेवाद्यंतांतरवर्ती आदावं
तेवावर्तितं अपि लयस्य सः अत एव त्रयविधुरः आद्यंतमध्यशून्यः ध्रुवः तेन त्वया रुज्यते ततश्रुवाः उत इत्यत
आह सत्वानां सत्वेन प्रतीतानां कार्याणां आद्यंते च यत् ध्रुवं वर्तमानं तदंतरालेपि तदेव ध्रुवं सत्कारणीद्विवत्
एवंध्रुवत्वेन कालतः परिच्छेदो नास्तीत्युक्तं देशतोप्यपरिच्छेदमाह क्षित्यादिभिरिति पूर्वस्मात्पूर्वस्मात् दशगु
णैरंडकोशो यत्र पतति अत्रैव केमेषः अणुकल्पः पततीत्यभिमानितः तस्मादनंतस्त्वं यस्मादेवं परमेश्वरस्त्वमेवातो दे

श्री॰ भा॰ ष॰ टी॰ ३८ अतस्त्वां विहाय विषयकामनयान्योपासकाः अनिष्टं प्राप्नुवन्तीत्याह विषयेति विषयेषु तृट् तृष्णा येषां ते ते नराकाराः पश
वः कुतो ये विभूतेरीशायास्ते उपासते तेन तद्रूपत्वात्ततः किं तत्राह तेषामिति तदनु उपास्यनाशेनैव तेषां यथा राजकुलेश्व
राजकुलनाशेन तेषां यथा सम्भ्रमः तत्सेवकानां अधिपतिनाश एव नश्यन्ति तदाह अये च परमो वधिः मय्येव विनश्यन्तीव ३८ वि
षयकामेनापि त्वत्सेवा मोक्षफलैवेत्याह काममधियः विषयकामनापि यदि परिमत्वयि रचिताः कृताश्चेत् न रोहन्ति
देहान्तरोत्पत्तये न भवन्ति करम्भबीजानि भर्जितबीजानि यथा यतोस्य जीवस्य गुणात् गुणाद्देहं देहात्सम्बन्धा भवन्ति अ
तः कामेनापि निर्गुणस्य तव भजनात् गुणैर्नैर्गुण्यं भवतीत्यर्थः ३९ फलकामनयापि तव दास्यं यदा मोक्षहेतुः
तदा किं भयवन्तो भगवतस्तव धर्ममाहात्म्यं वक्तुमिति च न तत्सम्प्रदायप्रवर्तकत्वेन च भवते स्तोति जितमिति यदा
भवान् भागवतं धर्ममाह तदा भगवंस्त्वया जितं सर्वोत्कर्षेणास्थितं तत्र हेतुः ये निष्किंचनाः सनत्कुमारादयो मनया
त्वयं भवन्तमपवर्गाय सेवन्ते तेन भगवता जितं येन धर्मो मितिवा ४० अतेव यतामेवाह विषममतिर्यत्र यस्मिन्

विषममतिर्न यत्र नृणां त्वमहमिति मम तवेति च यदन्यत्रापि विषमधिया रचितो यः स ह्यविशुद्धः
क्षयिष्णुरधर्मबहुलः ४१ कः क्षेमो निजपरयोः कियानर्थः स्वपरद्रुहा धर्मेण स्वद्रोहात्तव कोपः प
रसंपीड्या च तथाधर्मः ४२ न व्यभिचरति तवेक्षा यया ह्यभिहितो भागवतो धर्मः स्थिरचरसत्त्वकद
म्बेष्वपृथग्धियो यमुपासते त्वार्याः ४३ ॥

भागवतो धर्मो नास्ति यदन्यत्र यथान्यस्मिन् काम्यधर्मे नन्नसोपि वेदोक्तत्वाद्भव यद्य एव तत्राह विषमधिया शत्रु
मरणादिकामनया रचितो विहितो यः स ह्यविशुद्धः रागद्वेषादिमत्त्वात् क्षयिष्णुश्च अमेयफलत्वात् अधर्मबहु
लश्च हिंसाबहुलत्वात् तदुक्तं श्रीधरस्वामिभिः उभयमिहाविदेनायेन लक्षितो येन युज्यते ४१ एतदेव प्रपञ्चयति
कः क्षेमः किं कुशलं न किंचित् निजपरयोः स्वस्य परस्य च स्वपरद्रुहः स्वं परं च द्रुह्यतीति स्वपरद्रुट् तेन यतः स्व
द्रोहात् अत्यन्तकायक्लेशात् तव कोपः पीडा संभवति तदुक्तं गीतासु कर्षयन्तः शरीरस्थं भूतग्राममचेतसः
मां चैवान्तःशरीरस्थं तान्विद्ध्यासुरनिश्चयानिति ४२ तथा परसंपीड्या अधर्मः चशब्दात् तव कोपश्च अतस्त्वया
रागाधीनमपि कथं विहितं मार्गेण प्रवर्तयितुं काम्यधर्मो विहितो न तु तत्त्वदृष्ट्या भगवत् धर्मेण न तु तद्द्रोहेत्या
ह न व्यभिचरति तव परमार्थं जहाति न तव इत्यादृष्टिः अव्यभिचारे हेतुः स्थिरेति स्थावरजंगमप्राणिसमूहेषु समबुद्धा

राम ३८

एवंभूतस्य भागवतधर्मप्रवर्तकस्य तव दर्शनात् सर्वपापक्षयो भवतीति किं चित्रमित्याह नहीति ४४ अहो अतो
हेहं कृतार्थोस्मीत्याहाथेति अतो हेतोः तवावलोकेन परिमृष्टा निरस्ता आशये चित्ते मला येषां ते त्वद्दर्शनेवा
ममनारदोपदेशेन ज्ञानमित्याह विदितमिति विशेषेण ज्ञाप्यं प्रकाशनीयं कियदिव नकिमपीत्यर्थः सवितुर्य
था खद्योतैः प्रकाशनीयं नास्ति तद्वत् ननु लक्षणं भगवन्तं प्रणमति नमइति द्वाभ्यां सकलस्य जगतः स्थित्यादी
नामीशाय समर्थाय दुरवसिता अविज्ञाता आत्मगतिर्निर्जितत्वं यस्य तस्मै केषां कुयोगिनां कया क्रियया भिदाभे

नहि भगवन्नघटितमिदं त्वद्दर्शनान्नृणामखिलपापक्षयः यन्नामसकृच्छ्रवणात्पुक्कसकोपिविमु
च्यते संसारात् ४४ अथ भगवन्वयमधुना त्वदवलोकपरिमृष्टाशयमलाः सुरऋषि
णा यदुदितं तावकेन कथमन्यथा भवति ४५ विदितमनंत समस्तं तव जगदात्मनो जनैरिहाच
रितं विज्ञाप्यं परमगुरोः कियदिव सवितुरिव खद्योतैः ४६ नमस्तुभ्यं भगवते सकलजगत् स्थिति
लयोदयेशाय दुरवसितात्मगतये कुयोगिनां भिदा परमहंसाय ४७ यं वै श्वसंतमनुविश्वसृजः
श्वसंति यं चेकितानमनुचित्तय उच्चकंति भूमंडलं सर्षपायति यस्य मूर्ध्नि तस्मै नमो भगवतेस्तु सहस्र
मूर्ध्ने ४८ शुक उवाच संस्तुतो भगवानेवमनंतस्तमभाषत विद्याधरपतिं प्रीतश्चित्रकेतुं कु
रूद्वह ४९ श्रीभगवानुवाच यन्नारदांगिरोभ्यां ते व्याहृतं मेनुशासनं संसिद्धोसि तया राजन् विद्यया
दर्शनाच्च मे ५० अहं वै सर्वभूतानि भूतात्मा भूतभावनः शब्दब्रह्म परं ब्रह्म ममोभे शाश्वती तनू ५१

दृष्ट्या ४७ यं श्वसंतं चेष्टमानं वे किंतानं पश्यंतमनुचित्तयः ज्ञानेंद्रियाणि उच्चकंति स्वरूपं पश्यंति ४८ मे अनुशा
सनं मद्विषय उपदेशः तेन च तया विद्यया अस्मत् दर्शनात् संसिद्धोसि ५० बोधदार्ढ्याय स्वयमप्युपदिशा
ति अहमित्यादिना सर्वभूतान्यहमेव भूतानामात्मा भोक्ता अयमहमेव भोक्तृभोग्यात्मकं विश्वमव्यतिरिक्तं नाली
त्यर्थः यतो हे भूतभावनः भूतानां प्रकाशकः कारणं च ५१ ननु शब्दब्रह्मणः प्रकाशकं परं ब्रह्म कारणं तु तत्ते
नेउभे ममैव तनू इत्याह शब्दब्रह्मेति प्रायस्तनी याशास्वतो अतः स्वमेवं पश्येत्याह लोकेभोग्यप्रपञ्चो भोक्तृत्वेन वि
ततम् अत्र तमात्मानं लोकं चात्मनि भोग्यत्वेन संततं व्याप्तं तदुभयं च मया कारणात्मना व्याप्तं मायोचोभयं हतं का

ननु जाग्रदाद्यवस्थानानि जीवस्येद्दैर्द्देहस्य आत्मनो मायामात्राणीत्येवं विज्ञाय तेषां तद्द्रष्टारं अत एव परं तत्त्वस्यार
हितं आत्मानं स्मरेत् ननु तेषां द्रष्टारमिति कथमुच्यते ५३ स्वापे दृश्याभावेन द्रष्टृत्वाभावाद्वात्राह येनेति स्वप्ने पु
रुषो जीवः येन रूपेण तदा स्वापकाले आत्मनः स्वापं निर्गुणमतीन्द्रियं सुखं च वेद तमात्मानं ब्रह्म मामवेहि तदा सा
क्षित्वयोः संवेदने सुखमस्वाप्समिति स्मृतेरसंभवात् ५४ ननु स्वापसाक्षिणा दृष्टं कथं जाग्रदवस्थः स्मरेत् नह्य
न्येन दृष्टमन्यः स्मरति तत्राह उभयं प्रस्वापप्रतिबोधं च स्मरंतः अनुसंदधतः तयोः प्रस्वापप्रतिबोधयोः प्रकाशक
त्वेन तदन्वेति ताभ्यां व्यतिरिच्येत स च यैकैकापायेप्यनपायात् तत् ज्ञानं परं ब्रह्म तदेव न तु भिन्नमित्यर्थः अतो
बाल्यदृष्टस्य यौवने स्मृतिवदवस्थाभेदेपि स्वापानुभवयोः स्मरणं घटत इति भावः तदेवंभूतमात्मानमवेहीत्युक्तं पुंसः
विपद्दोषमाह यदेतद्विस्मृतं मद्भावं मम स्वरूपं ब्रह्म विस्मृतं सत् आत्मनः सकाशाद्भिन्नं भवति तत एतस्य

यथा प्रसुप्तः पुरुषो विश्वं पश्यति चात्मनि आत्मानमेकदेशस्थं मन्यते स्वप्न उत्थितः ५२ एवं जागर
णादीनि जीवस्थानानि चात्मनः मायामात्राणि विज्ञाय तद्द्रष्टारं परं स्मरेत् ५३ येन प्रसुप्तः पुरुषः
स्वापं वेदात्मनस्तदा सुखं च निर्गुणं ब्रह्म तमात्मानमवेहि माम् ५५ उभयं स्मरतः पुंसः प्रस्वाप
प्रतिबोधयोः अन्वेति व्यतिरिच्येत तज्ज्ञानं ब्रह्म तत्परम् ५६ यदेतद्विस्मृतं पुंसो मद्भावं भिन्नमात्म
नः ततः संसार एतस्य देहाद्देहो मृतेर्मृतिः ५७ लब्ध्वेह मानुषीं योनिं ज्ञानविज्ञानसंभवाम् आत्मा
नं यो न बुद्ध्येत न क्वचित्क्षेममाप्नुयात् ५८ स्मृत्वेहायां परिक्लेशं ततः फलविपर्ययम् अभयं
चाप्यनीहायां संकल्पाद्विरमेत्कविः ५९

सः संसारो भवति संसारस्वरूपमाह देहाद्देहं जन्मांतरं पुनर्जन्म मृतेरनंतरं पुनर्मृतिश्चेति ५६ योत्यंतरेषिमो
गादिसंपादनेषां ज्ञानार्थत्वमेव यातित्यभिप्रायाह लब्ध्वेति ज्ञानं शास्त्रोक्तं विज्ञानमपरोक्षं तयोः संभवो यस्यां
तो ५८ वैराग्यार्थमाह ईहायां प्रवृत्तिमार्गे तत ईहातः अनीहायां अप्रवृत्तिमार्गे तु अभयं मो
क्षो भवतीति च स्मृत्वा फलसंकल्पाद्विरमेत् पाठांतरे नोभयं परिक्लेशः फलवि
पर्ययश्च नास्तीत्येवं स्मृत्वा ५९ रामाय नमः ॥

एतद्धिहृएोतिसुखवायेतित्रिभिः दुःखस्यानिवृत्तिः सुखस्याप्राप्तिः ५९ यउग्रमेप्रवीणायमित्यभिमानवा
नांस्यानत्रयविलक्षणोनरीयोवुद्धा ६० दृष्टश्रुताभिर्मात्राभिः ऐहिकामुष्मिकविषयैः स्वेनतेजसाविवे
कबलेन ६१ नचातःपरंभ्रत्युषोंधीत्यस्मिन्नाह एतावानिति योगिनैपुण्यंयस्याः सावुद्धिर्यैयापरस्यात्मनः
एवंदर्शनमिर्भिन्नदेनावानेव ६२ ६४ इति भावा दीपि यां ष स्कंधे डशो यः १६ ततःसमदृशो

सुखायदुःखमोक्षायकुर्वातेदंपतीक्रियां ततोनिवृत्तिरप्राप्तिर्दुःखस्यचसुखस्यच ५९ एवं
विपर्ययंबुद्ध्वानृणांविज्ञाभिमानिनां आत्मनश्चगतिंसूक्ष्मांस्थानत्रयविलक्षणां ६०॥ दृष्टश्रुताभि
मात्राभिर्विमुक्तःस्वेनतेजसा ज्ञानविज्ञानसंतृप्तोमद्भक्तःपुरुषोभवेत् ६१ एतावानेवमनुजैर्योगा
नैपुण्यबुद्धिभिः स्वार्थःसर्वात्मनाज्ञेयोयत्परात्मैकदर्शनं ६२ त्वमेतच्छ्रद्धयाराजन्नप्रमत्तोवचोमम
ज्ञानविज्ञानसंपन्नोधारयन्नाशुसिध्यसि ६३ इति भाग तेष स्कंधेचित्रकेतूपाख्यानेनामषोड
शोध्यायः १६ श्रीशुकउवाच यतश्चांतर्हितोनंतस्तस्यैकृत्वादिशेनमः विद्याधरश्चित्रकेतुश्चचारा
गगनेचरः १ सलक्षंवर्षलक्षाणामव्याहतबलेंद्रियः स्तूयमानोमहायोगीमुनिभिःसिद्धचारणैः
२ कुलाचलेंद्रद्रोणीषुनानासंकल्पसिद्धिषु रेमेविद्याधरस्त्रीभिःगापयन्हरिमीश्वरं ३ एकस्मा
दत्तेनयर्थगर्वीत्प्राचीनकर्मतः आसुरींयातिमायन्नोभवानीशापतःसतां ४ सएकदाविमानेन
विष्णुदत्तेनभास्वता गिरिशंददृशेगच्छन्परीतंसिद्धचारणैः ५ चित्रकेतुउवाच एषलोकगुरुः
मादाङ्कैमेवक्ताशरीरिणां आस्तेमुख्यःसभायांवैमिथुनीभूयभार्यया ७ आलिंग्यांकीकृतांदे
वींबाहुनाऋषिसंसदि उवाचदेव्याःशृण्वंत्याजहासोच्चैस्तदंतिके ८ जटाधरस्तीव्रतपाब्र ॥
ह्मवादीसभापतिः अंकीकृत्यस्त्रियंचास्तेगतह्रीःप्राकृतोयथा ९ ॥

मोचोमहाहिंप्राप्यवैचरन् विहृत्यगिरिशेशापाडमायोहतनोगतः यतःयस्यादिशोनंतस्यैनमः नमस्कृ
हत्वा १२ सविद्याधरःस्त्रीभिर्हरिंगायमानोरेमेइतिद्वयोरन्वयः अव्याहतेबलमिंद्रियाणांचयस्यनाना
वियासंकल्पेनैवसिद्धयोयासु ३ नदाहैकदेत्यादिना ४ ५ अंगीकृत्याभुजसंगेनेकीकृत्यदेवीबाहुनाआलिंग्या
स्थितेउवाचमहासचनस्यांतिकेस्थितःसन् ८ एवंमेवक्ताअवहतिशरीरिणांमध्येआस्तेमुख्यःसभार्ययामिथुनीभूयाचास्ते

श्री०
भा० ष०
टी०
४.

अगाधधीरगाधा धीर्यस्य सः १० न तस्य वीर्यप्रभावं विद्वान् तस्मिन्निर्जितात्माभिमानिने जितेन्द्रियोऽहमित्यभिमानव
ते धृष्टाय निरुद्धक्रोधेनाह ११ विरुद्धं प्रवर्तमानं करोतीति विप्रकृत् १२ अतिवर्तिनं शास्त्रमतिवर्तनशीलं ये नो निषेध
न्ति निवारयन्ति १३ सूरीन् परिभूयात्मानं हत्वा जगद्गुरुं यः प्रशास्ति तत्तस्मात् १४ ननु हरिभक्तोऽयं न दण्ड्य इति
चेत्तत्राह नायं साधुभिः परिसेवितं वैकुण्ठस्य पादमूलोपसर्पणमर्हति १५ अत इति हे पुत्र यथा भूयो महतां

प्रायशः प्राकृताश्चापि स्त्रियं रहसि बिभ्रति अयं महाव्रतधरो विभर्ति सदसि स्त्रियं १० शुक उवाच
भगवानपि तच्छ्रुत्वा प्रहस्यागाधधीर्नृप तूष्णीं बभूव सदसि सभ्याश्च तदनुव्रताः ११ इत्यतद्वीर्यविदु
षि ब्रुवाणे बह्वशोभनं रुषाह देवी धृष्टाय निर्जितात्माभिमानिने १२ देव्युवाच अयं किमधुना
लोके शास्ता दण्डधरः प्रभुः अस्मद्विधानां दुष्टानां निर्लज्जानां च विप्रकृत् १३ न वेद धर्मं किल पद्म
योनिर्न ब्रह्मपुत्रा भृगुनारदाद्याः न वै कुमारः कपिलो मनुश्च ये नो निषेधन्त्यतिवर्तिनं हरम् १४ ना
यमर्हति वैकुण्ठपादमूलोपसर्पणं संभावितमतिस्तब्धः साधुभिः पर्युपासितं १५ एषामनुध्येयपदा
ब्जयुग्मं जगद्गुरुं मङ्गलमङ्गलं स्वयं यः क्षत्रबन्धुः परिभूय सूरीन्प्रशास्ति धृष्टस्तदयं हि दण्ड्यः १६ अतः
पापीयसीं योनिमासुरीं याहि दुर्मते यथेह भूयो महतां न कर्ता पुत्र किल्बिषं शुक उवाच एवं शप्तश्चि
त्रकेतुर्विमानादवरुह्य सः प्रसादयामास सतीं मूर्ध्ना नम्रेण भारत १७ चित्रकेतुरुवाच प्रतिगृह्णामि
ते शापमात्मनोऽञ्जलिनाम्बिके देवैर्मर्त्याय यत्प्रोक्तं पूर्वदिष्टं हि तस्य तत् १८ संसारचक्र एतस्मिञ्ज
न्तुरज्ञानमोहितः भ्राम्यन्सुखं च दुःखं च भुङ्क्ते सर्वत्र सर्वदा १९ नैवात्मा न परश्चापि कर्ता स्यात्सुख
दुःखयोः कर्तारं मन्यतेऽत्राज्ञः आत्मानं परमेव च २० गुणप्रवाह एतस्मिन्कः शापः को न्वनुग्रहः
कः स्वर्गो नरकः को वा किं सुखं दुःखमेव वा २१ एकः सृजति भूतानि भगवानात्ममायया एषां बन्धं

किल्बिषमपराधं न कर्ता न करिष्यसि तथा याहीत्यर्थः १६ १७ पूर्वं दिष्टं प्राचीनकर्मप्राप्तमेवायं च १८ अत एवम
नवचनात्कोपि दोष इत्याह नैवेति १९ एवं स्वर्गादिकमङ्गीकृत्योक्तं २० इदानीं तदपि वस्तुतो नास्तीत्याह २१ गु
णानां मास्यात्तत्राह एकः परमेश्वरो मायया निमित्तभूतया भूतानि प्राणिनः सृजति एषां बन्धादि च सृजति नि

नन्वेवंभूतविषमस्वभावोनस्यात्किंकारणंप्रियादिवैषम्याभावादित्याशंक्य यद्यप्यप्रियाद्वैषम्याभावोनसंगति
तथापितत्कर्मवशात्सर्वत्रवर्ततइत्याहतस्येतिद्वाभ्यां प्रतीपःप्रियःनज्ञातिर्बंधुर्वान्यपरःनचद्वेष्यःसर्वत्रसमस्य
तत्कुतः निरंजनस्यनिःसंगस्यातएवतन्निमित्तेसुखेरागोनास्ति रागाद्वेषोरोषःकुतःस्यात् २२ यद्येवं
तथापितस्यशक्त्यामायययाविसर्गः पुण्यपापादिलक्षणंकर्मएषांशरीरिणांसुखाबाधर्ममवकल्पतेसमर्थो
भवति तदुक्तंगीतासु भूतभावोद्भवकरोविसर्गः कर्मसंज्ञितइति २४ अथतस्यात् हेभामिनिकोपनेत्वा

नतस्यकश्चिद्दयितःप्रतीपोनज्ञातिबंधुर्नपरोनचस्वः समस्यसर्वत्रनिरंजनस्यसुखेनरागः
कुतएवरोषः २३ तथापितच्छक्तिविसर्गएषांसुखायदुःखायहिताहिताय बंधायमोक्षाय
चमृत्युजन्मनोःशरीरिणांसंसृतयेवकल्पते २४ अथप्रसादयेनत्वांशापमोक्षायभामिनि
यन्मन्यसेह्यसाधूक्तंममतत्क्षम्यतांसति २५ शुकउवाच इतिप्रसाद्यगिरिशौचित्रकेतुररिंदम
जगामस्वविमानेनपश्यतोःस्मयतोस्तयोः २६ ततस्तुभगवान्रुद्रोरुद्राणीमिदमब्रवीत् दे
वर्षिदैत्यसिद्धानांपार्षदानांचशृण्वतां २७ श्रीरुद्रउवाच दृष्टवत्यसिसुश्रोणिहरेरद्भुतकर्म
णः माहात्म्यंभृत्यभृत्यानांनिःस्पृहाणांमहात्मनां २८ नारायणपराःसर्वेनकुतश्चनबिभ्यति
स्वर्गापवर्गनरकेष्वपितुल्यार्थदर्शिनः २९ देहिनांदेहसंयोगाद्द्वंद्वानीश्वरलीलया सुखं
दुःखंमृतिर्जन्मशापानुग्रहएवच ३० ॥

केवलंप्रसादयामि नतुशापमोक्षायकिंप्रसादनेनातआह ममोक्तंसाध्वप्यसाधुयन्मन्यसेतत्क्षम्यतामिति
२५ गिरिशौभवानीशंकरौप्रसाद्यस्मयतोः विस्मयंकुर्वतोः तयोः २६ २७ २८ स्वर्गादावपितुल्यार्थः
प्रयोजनमितिद्रष्टुंशीलंयेषांतेतथा २९ तत्रहेतुमेवहेतुद्वयमाहद्वा
भ्यां देहीनांसुखंदुःखमित्यादिद्वंद्वानि ईश्वरस्यलीलयामाययाभवंति ३० ॥ राम

श्री॰ भा॰ष॰ टी॰ ८१

तेषु च गुणत्रय दोषविकल्प इत्येवान्वयः इष्टानिष्टभेद इत्ययः स्फुरति अत्मन्यर्थभेदः स्वपरादिभेदः तेषां स्वप्रत्ययाच्चाविवेकहतो भवति स्रजिव सर्पमाल्यादिभिदा यथा तथैव हत इत्यर्थः स्वरगावदति आर्षपाठोऽतस्तेषु गमे ३१ अतो भगवत्तात्तो निस्पृहत्वमुचितमेवेत्याह वासुदेव इति ज्ञानवैराग्ययोर्वीर्यबलेयेषां तेषां यथा पाश्रयो विषयिष्वदृश्या आश्रयणीयोऽर्थो नास्ति ३२ इतितमभिप्रायेलीलावाय यदावयंनविद्मः तदास्वरूपेण

अविवेकहतः तेषामर्थभेदस्त्वात्मनि गुणदोषविकल्पश्च भिदेव स्रजिवत्कृतः ३१ वासुदेवे भगवति भक्तिमुद्वहतां नृणां ज्ञानवैराग्यवीर्याणां नेह कश्चिद्व्यपाश्रयः ३२ नाहं विरिञ्चो न कुमारनारदौ न ब्रह्मपुत्रा मुनयः सुराः विदाम यस्येहितमंशकांशका न तत्स्वरूपं पृथगीशमानिनः ३३ न ह्यस्यास्ति प्रियः कश्चिन्नाप्रियः स्वपरोऽपि वा आत्मत्वात्सर्वभूतानां सर्वभूतप्रियो हरिः ३४ तस्य चायं महाभागश्चित्रकेतुः प्रियोऽनुगः सर्वत्र समदृक् शान्तो ह्यहं चैवाच्युतप्रियः ३५ तस्मान्न विस्मयः कार्यः पुरुषेषु महात्मसु महापुरुषभक्तेषु शान्तेषु समदर्शिषु ३६ श्रीशुक उवाच इति तस्य वचः श्रुत्वा शिवस्योमाभिभाषिते बभूव शान्तधी राजन्देवी विगतविस्मया ३७ इति भागवतो देव्याः प्रतिशप्तुमलन्तमः मूर्ध्ना स जगृहे शापमेतावत्साधुलक्षणं ३८ जज्ञे त्वष्टुर्दक्षिणाग्नौ दानवीं योनिमाश्रितः वृत्र इत्यभिविख्यातो ज्ञानविज्ञानसंयुतः ३९ एतत्ते सर्वमाख्यातं यन्मां त्वं परिपृच्छसि वृत्रस्यासुरजातेश्च कारणं भगवन्मते ४० इतिहासमिमं पुण्यं चित्रकेतोर्महात्मनः माहात्म्यं विष्णुभक्तानां श्रुत्वा बन्धाद्विमुच्यते ४१ य एतत्प्रातरुत्थाय श्रद्धया वाग्यतः पठेत् इतिहासं हरिं स्मृत्वा स याति परमां गतिं ४२ इति भाग॰ षष्ठ स्कंधे चित्रकेतूपाख्याने नाम सप्तदशोऽध्यायः १७ ॥

शकांशका अपि संतः पृथगीशमानिनः न विद्मः एव ३३ अत एव हरिरपि सर्वेषां भूतानां प्रियः ३४ अहं चैवाच्युतप्रियः तस्मात्तस्मिन् क्रोधो न भूदिति भावः ३५ ३७ प्रतिशापे दातुमलं तमः समर्थोऽपि ३८ अस्य रमातः असुरस्वभावेनोत्पन्नैः भगवति मतेश्च ४० ४१ एतत् पठेत् ४२ इति श्री वार्थे सप्तदशोऽध्यायः

६ रामः ८१

आदित्यानांवंतर्यस्यन्पूर्वंप्रसंगतः प्रोक्तमिंद्रकृतंविश्वरूपवृत्रवधादिकं अदितेः पंचमादीनांपुत्राणामन्व
याह्वितेः पश्चाद्ग्रावितेर्गर्भे शक्रेणामरुतोभिदा तद्वंशमनुक्रम्यसप्रसंगायथाक्रमम् आदित्यानामथान्वि
यानिवंशानाहमुनीश्वरः दक्षकन्यानुकथनेन आदित्याः द्वादशपुत्राः प्रोक्ता विवस्वानर्यमापूषात्वष्टाथसविताभ
गः धाताविधातावरुणोमित्रः शक्रउरुक्रमः इति तत्राद्याख्यातमाद्यस्यविश्वरूपविशेषेणपाख्यानेनत्वष्टुर्वंश
मनुवाच इदानींसवितुर्वंशमाह पृश्निस्तिति सावित्रीमित्यादि पृश्निस्तत्पूर्वं रस्याचपंगाः पशुः पशुयागम् महा

शुकउवाच पृश्निस्तुपत्नीसवितुः सावित्रींव्याहृतींत्रयीं अग्निहोत्रंपशुंसोमंचातुर्मास्यंमहामखान्
१ सिद्धिर्भगस्यभार्यांगमहिमानंविभुंप्रभुं आशिषंचवरारोहांकन्यांप्रासूतसुव्रताम् २ धातुःकुहूः
सिनीवालीराकाचानुमतिस्तथा सायंदर्शमथप्रातःपूर्णमासमनुक्रमात् ३ अग्नीन्पुरीष्यानाधत्तक्रि
यायांसमनंतरः चर्षणीवरुणस्यासीद्यस्यांजातोभृगुःपुनः वाल्मीकिश्चमहायोगीवल्मीकादभव
त्किल ४ अगस्त्यश्चवसिष्ठश्चमित्रावरुणयोर्ऋषी रेतःसिषिचतुःकुंभेउर्वश्याःसंनिधौद्रुतम् ५
रेवत्यांमित्रउत्सर्गमरिष्टंपिप्पलंव्यधात् पौलोम्यामिंद्रआधत्तत्रीन्पुत्रानितिनःश्रुतम् ६ जयंतमृष
भंताततृतीयंमीढुषंप्रभुः ७ उरुक्रमस्यदेवस्यमायावामनरूपिणः कीर्तौपत्न्यांबृहच्छ्लोकस्तस्या
सन्सौभगादयः ८ तत्कर्मगुणवीर्याणिकश्यपस्यमहात्मनः पश्चाद्वक्ष्यामहेदित्यांयथैवावतता
रह ८ ॥

मखान्पंचयज्ञान् २ धातुर्भार्याकुहूःसायंपुत्रंप्रासूत एवंसिनीवालीदर्शमित्यनुक्रमात् समनंतरःशेविधाताक्रि
यायाभार्यायांपुरीष्यानग्नीन्पंचचितीन् पुरीष्यासोम्यग्नयः इतिपंचवापतेअग्नयोयावचितयः इतिश्रुतेः ४ चर्षणी
वरुणस्यभार्यासीत् पूर्वंब्रह्मणःपुत्रोभृगुर्यस्यांपुनर्जातः वाल्मीकिर्वरुणस्यैवपुत्रोभवत् यतोवरुणस्यासावथा
ह्लोकोपुत्रो ५ अयोत्सर्गोदयोमित्रस्यासाधारणाः तयोरेवसाधारणौहोपुत्रौचाह अगस्त्यश्चवसिष्ठश्चमित्रावरुण
योरभवताम् यतस्तावपिकुंभेरेतःसिषिचतुः मत्रेहजातावितितात्मनाभिःकुंभेरेतःसिषिचतुःसमानमितिश्रुतेः

श्रीमद्भा ६ स्कंधटी ५८

श्रीः
भा॰ पु॰
टी॰
४२

हिरण्यकशिपुर्हिरण्याक्षस्तत्र प्रथमं हावेव तौ च कीर्तितौ तृतीयस्कंधे ११ विप्रचित्तौ दानवाद्दैतेः सकाशात्त
द्देत्यमगृह्णीत १२ ततः संह्रादमसृत १३ योमेवृत्रंपवानापिप्रवेतेत्वल्लेयंपेवेनवानापिवास्तेत्यत्वयः ततो व
ले सकाशादभवत् तस्य बलीरनुभावमनुभावः सब्रोकाशणकीर्त्यहं यदा श्रवभाव्यतेसद्भिः स्तूयते रत्न

श्च कश्यपदायादान्दैत्यान्कीर्तयामि ते यत्र भागवतः श्रीमान्प्रह्रादो बलिरेव च ९ दितेर्द्वावेव
दायादौ दैत्यदानववन्दितौ हिरण्यकशिपुर्नाम हिरण्याक्षश्च कीर्तितौ १० हिरण्यकशिपोर्भार्या
कयाधुर्नाम दानवी जंभस्य तनया सा तु सुषुवे चतुरः सुतान् ११ संह्रादं प्रागनुह्रादं ह्रादं प्रह्रादमेव
च तत्स्वसा सिंहिका नाम राहुं विप्रचितोऽग्रहीत् १२ शिरोऽहरद्यस्य हरिश्चक्रेण पिबतोऽमृतम् संह्राद
स्य कृतिर्भार्यासूत पंचजनं ततः १३ ह्रादस्य धमनिर्भार्यासूत वातापिमिल्वलं योगस्त्यायमाते।
थ्येयपवेवातापिमिल्वलम् १४ अनुह्रादस्य सूर्यायां बाष्कलो महिषस्तथा विरोचनस्तु प्राह्रादिर्दे
व्यांतस्याभवद्बलिः १५ बाणज्येष्ठं पुत्रशतमशनायां ततोऽभवत् तस्यानुभावः सुश्लोक्यः पश्चादेवा
भिधास्यते १६ बाणआराध्य गिरिशं लेभे तद्गणमुख्यताम् यत्पार्श्वे भगवानास्ते ह्यद्यापि पुरपा
लकः १७ मरुतश्च दितेः पुत्राश्चत्वारिंशन्नवाधिकाः त आसन्नप्रजाः सर्वे नीता इन्द्रेण सात्मताम् १८
राजोवाच कथं त आसुरं भावमपोह्यौत्पत्तिकं गुरो इन्द्रेण प्रापिताः सात्म्यं किं तत्साधु कृतं हि तैः
१९ इमे श्रद्दधते ब्रह्मन्नृषयो हि मया सह परिज्ञानाय भगवंस्तन्नो व्याख्यातुमर्हसि २० सूत उवाच
तद्विष्णुरातस्य स वादरायणिर्वचो निशम्याहृतमल्पमर्थवत् सभाजयन्संनिभृतेन चेतसा जगाद सत्राय॒ण सर्वदर्शनः २१ हतपुत्रा दितिः
शक्रपार्ष्णिग्राहेण विष्णुना मन्युना शोकदीप्तेन ज्वलन्ती पर्यचिन्तयत् २२ कदा नु भ्रातृहन्तारमिंद्रियाराममुल्बणम् अक्लिन्नहृदयं पापं घात
पिताकायेसत्वं २२ क्रिमिविट्ठलसंज्ञासीद्गुसेपणाभि
ह्नितस्वच भृत्यपुरुकृतेसार्थं किं वेदनिरयायनः २४

नुभावं स सुश्लोक्यं यशोऽतिशयः १६ तस्य गणेषु मुख्यतां प्राधान्यं १७ सात्मतां समानरूपताम् १८ देवत्वं प्रापिताः २०
प्राहृतं साद्रं अल्पं मितात्तरं अर्थवत् बह्वर्थं युक्तं सत्रमयनं प्राप्नोयोयस्य हे सत्रायन शौनक २१ पार्ष्णिग्रा
हेण पृष्ठतः सहायेन २२ उल्बणं क्रूरम् अक्लिन्नहृदयं कठिनचित्तम् २४

ननु यज्ञा अस्वदेहत्वात्तार्थं मन्येषां ज्ञातं कथोत्येवं किमर्थं विवेत्तव्यमाह किमिति ईशः प्रभुः इत्यभिहितस्यापि यस्य सर्वेषां सर्व
देहस्य मरणानंतरं हि विदित्वा वास्थितस्य किमर्थं इति श्वादिभिर्भक्षितस्य नन्विष्ठति कृमयस्य भस्मेति सत्ता आसीत् वे
कृतेतस्य देहस्यार्थे यो भूतेभ्यो द्रुह्यति स किंस्वार्थं वेद नैवेदं वेत्तव्यं हेतुः यतो भूतद्रोहात् निरयो भवति २५ इदं द्रोहादि
कं ध्रुवं नित्यं माषामनस्य मन्यमानस्य प्रतनं तदुच्छिवलवेतो यस्य तस्येदं स्ययो मदन्तस्य शोषकः द्रोमे यत्नेन

प्राणाभिमानस्य तस्यैव ध्रुवमुन्नद्ध चेतसः मदपोषक इत्यस्य प्रिया हेन मतो हि मे २५ इति भावेन साभर्तमाव
वासमकृत्प्रिये शुश्रूषयानुरागेण प्रश्रयेण दमेन च २६ भक्त्या परमया राजन्मनोज्ञैर्वल्गुभाषितैः स
मोत्र ग्राह भावज्ञा सस्मितापांगवीक्षणैः २७ एवं स्त्रिया जडीभूतो विद्वानपि विदग्धया वाहमित्याह
विवशो नतद्विर्यह्वियोषिति २८ विलोक्यैकांतभूतानि भूतान्यादौ प्रजापतिः स्त्रियं चक्रे स्वदेहार्धं यया
पुंसां मतिर्हृता २९ एवं शुश्रूषतस्तात भगवान्कश्यपः स्त्रिया प्रहस्य परमप्रीतो दितिमाहाभिनंद्य च
३० कश्यप उवाच वरं वरय वामोरु प्रीतस्तेहमनिंदिते स्त्रिया भर्तरि सुप्रीते कः काम इह चागमः ३१
पतिरेव हि नारीणां दैवतं परमं स्मृतं मानसः सर्वभूतानां वासुदेवः श्रियः पतिः ३२ स एव देवतालि
गैर्नामरूपविकल्पितैः इज्यते भगवान्पुंभिः स्त्रीभिश्च पतिरूपधृक् ३३ तस्मात्पतिव्रता नार्यः श्रेयस्का
माः सुमध्यमे यजंतेऽनन्यभावेन पतिमात्मानमीश्वरं ३४ सोहं त्वयार्चितो भद्रे ईदृग्भावेन भक्तितः तं ते
संपादये काममसतीनां सुदुर्लभम् ३५

नाभूयात्तमवेत् २६ भर्तुः प्रियाचरणमेवेति भावेन साभर्तुः प्रियमसकृदाचचार २६ विवशः स्त्रीपरतंत्रः मत्वाहं त्वत्वम
नोरथं पूरयिष्यामीति यदाह तन्नविचित्रम् २८ विलोक्यैति एकांतानि निःसंगानि मैथुनेन सृष्टिं द्रष्टुं स्वदेहार्धं मे
वस्त्रियं चक्रे २९ एवं स्त्रिया शुश्रूषितः सन् ३० इह च कामान्तरं च अगमः अप्राप्यः ३१ ननु परमेश्वरे सुप्रीते सर्वो
कामः प्राप्तिरिति प्रसिद्धं तत्राह पतिरेवेति ननु मनसि स्थितः श्रीवासुदेव एव लक्ष्मीपतिः परं दैवमिति प्रसिद्धम्
सत्यं स एव स्वाधिकारानुरूपभेदैः पूज्यत इत्याह मानस इति सार्धेन देवतालिंगमूर्तिभिः रूपैर्लोकैस्तत्स्वान्यवा देना
मरूपादिरूपैश्च तु हस्तपादादिनाभ्यां विविधं कल्पितैः ३३ इदं हृत्यमिदं हृत्यं च अमृत्यपूत्यं सत्य येनेज्यते विस्वनाम महाये

श्रीः श्रीः भा॰ ६ टी॰ ८

सभावमनुवर्तमानाया योषितः कोऽतिक्रमः प्रभवाय्नः ३९ सभावमेवाह द्वाभ्यां शरत्पद्मोत्सवेत्यादिना बोधिका सोयस्मि
न् प्रवणेष्वतीनयोरमृतेनत्वं यारोपमंत्रितम् ४० स्वाशिषात्मना स्वार्थकामनयात्मैव कृष्टत्वेन प्रवीयमाना ना
४१ तदेवमनुकल्पते योग्यभवति सुधंभावः वैसवव्रतेनावदृश्यामितेनवास्याः शुद्धाविनाशाः इंद्रक्रोधोनिव
तिष्यते पुत्रस्त्वमत्यो भविष्यसीति दीर्घकालेनैव व्रतस्य कष्टाविहरणापसनीदृस्यवथापिनभविष्यतीति ४२ हेभ
द्रे भेजः यथावृष्युदिया यापयिष्यसि तर्हीदृशो भविष्यति वैगुण्येतदेवबान्धवो भविष्यति वैसववनाहुतस्य कथ्या
विवैगुण्यापेसति सवैधायफल्याभावात् ४४ कार्याण्यवश्यकाणि व्रतेयानिनघ्नंति नावश्यकानिनवाति

निशम्य तद्वचो विप्रो विमनाः पर्यतप्यत अहो अधर्मः सुमहानद्य मे समुपस्थितः ३७ अहो अर्थेंद्रिया
रामो योषिन्मय्येह मायया गृहीतचेताः कृपणः पतिष्ये नरके ध्रुवं ३८ कोऽतिक्रमोऽनुवर्तन्त्याः स्वभाव
मिह योषितः धिङ्मां बताबुधं स्वार्थे यदहं त्वजितेंद्रियः ३९ शरत्पद्मोत्सवं वक्त्रं वचश्च श्रवणामृतं
हृदयं क्षुरधाराभं स्त्रीणां को वेद चेष्टितं ४० न हि कश्चित्प्रियः स्त्रीणामंजसा स्वाशिषात्मना पतिं पुत्रं
भ्रातरं वा घ्नंत्यर्थे घातयंति च ४१ प्रतिश्रुतं ददामीति वचस्तन्न मृषा भवेत् वधं नार्हति चेंद्रोऽपि तत्रेदमुप
कल्पते ४२ इति संचिंत्य भगवान्मारीचः कुरुनंदन उवाच किंचित्कुपित आत्मानं च विगर्हयन् ४३ कश्यप
उवाच पुत्रस्ते भविता भद्रे इंद्रहा देवबान्धवः संवत्सरं व्रतमिदं यद्यंजो धारयिष्यसि ४४ दितिरुवाच
धारयिष्ये व्रतं ब्रह्मन्ब्रूहि कार्याणि यानि मे यानि चेह निषिद्धानि न व्रतं घ्नंति यान्युत ४५ कश्यप उवाच
न हिंस्याद्भूतजातानि न शपेन्नानृतं वदेत् न छिंद्यान्नखरोमाणि न स्पृशेद्यदमंगलं ४६ नाप्सु स्नायान्न कु
प्येत न संभाषेत दुर्जनैः न वसीताधौतवासः स्रजं च विधृतां क्वचित् ४७ नोच्छिष्टं चंडिकान्नं च सामिषं वृषलाहृतं
भुंजीतोदक्यया दृष्टं पिबेदंजलिना त्वपः ४८ नोच्छिष्टास्पृष्टसलिला संध्यायां मुक्तमूर्धजा अनर्चितासंयतवाग्नासंवीता बहिश्चरेत् ४९

षिद्धानि किं तन्न्यनुज्ञातानि तानि सर्वाण्यपि ब्रूहि ४५ तत्रैकविंशतिविधिनिषेधानाह नहिंस्यादिति पंचभिः न शपेन्नाक्रोशेत्
यदमंगलं कपालास्थ्यादिकं तन्न स्पृशेत् ४६ नाप्सु प्रविश्य स्नायात् पूर्वं विधृतां स्रजं पुनर्न धारयेत् ४७ भोजने पंच
निषेधानाह नोच्छिष्टमिति चंडिकान्नं भद्रकाल्यै निवेदितं पिपीलिकाद्युपहतं वा अंजलिना त्वपो न पिबेत् ४८ शूद्राहृत

[illegible]

८३

प्रायनेह्योनिषेधानाद नायोत्तपादेतिनापराकाश्रिमाशिवाः ५० कार्यीण्याह्यौनवामइतिहाभ्यां मातरापा
त्यघममभाजननात ५१ वीरवतीजीवन्नर्तकाः सर्वास सज्यकोष्टगतेऊल्यनगेतम ५२ पुंसवनप्रशत्यन्निकरं
तुभ्येनव ५३ हरिरिंद्रोधृतस्याच्छिद्रप्रेप्सुःप्रान्तमिक्षुः जितऊदिलःसाधुवेषः मृगहाल्लुब्धकायथा मृगवे
वनायमृगवेषोभवतिनहत ५४ केनमेपिवस्यादितिचिंतोभागतः प्रसह्यवारिश्चामावयोतोष्ठिष्ठ निद्रया।

नायोतपाहान्सयतानाईपानुउदच्छिन्नाः प्रायीतनापराङ्गन्येर्ननग्नानवमन्य्ययोः ५० योतभसाःश्र
विर्विंध्यसर्वमंगलसंयुता प्रजयेत्पातरायात्माग्गाविप्राश्रियमच्युतम् ५१ स्त्रियोवीरवतीश्चार्च्यैः
त्स्रग्गन्धवलिमंडनैः पतिंवाच्योपतिष्टेतध्यायेकोष्टगतेवतम ५२ संवत्सरंपुंसवनंव्रतमेतदवि
प्लुते धारयिष्यसिदेतभ्यंशत्रुहाभविताम्रुतः ५३ बाढमित्यभ्युपेत्याथदितीराजन्महामनाः
काश्यपंगर्भमाधत्तव्रतंवोजादधारसा ५४ मातृषस्वरभिप्रायमिंद्रआज्ञायमानद शुश्रूषणेनाश्र
मस्थांदितिपर्यचरत्कविः ५५ नित्यंवनात्सुमनसःफलमूलसमित्कुशान् पत्राङ्कुरमृदोपश्चका
लेकालउपाहरत् ५६ एवंतस्याव्रतस्थायाव्रतच्छिद्रंहरिर्नृप प्रेप्सुःपर्यचरज्जिह्मोमृगहेवमृगा
कृतिः ५७ नाध्यगच्छद्व्रतच्छिद्रंतत्परोथमहीपते चिंतांतीव्रांगतःशक्रःकेनमेस्याच्छिवंत्विह ५८
एकदासातुसन्ध्यायामुच्छिष्टाव्रतकर्शिता अस्पृष्टवार्यधौताङ्घ्रिःसुष्वापविधिमोहिता ५९ लब्ध्वातदं
तरंशक्रोनिद्रापहृतचेतसः दितेःप्रविष्टउदरंयोगेशोयोगमायया ६० चकर्तसप्तधागर्भंवज्रेणकन
कप्रभम् रुदन्तंसप्तधैकैकंमारोदीरितितानपुनः ६१ तेतमूचुःपाट्यमानाःसर्वेप्रांजलयोनृप नोजिघांस
सिकिमिंद्रभ्रातरोमरुतस्तव ६२ मामैष्टभ्रातरोमह्यंयूयमित्याहकौशिकः अनन्यभावान्पार्षदाना
त्मनोमरुतांगणान् ६३ नममारदितेर्गर्भःश्रीनिवासानुकम्पया बहुधाकुलिशक्षुण्णोद्रौण्यस्त्रेणाय
थात्वया ६४ ... 

पह्रतंवेतोयस्याः ५५ मारोदीरित्युपलालयन्निवतान्पुनः सप्तधाचकर्तेविच्छेद ६१ कौशिकइंद्रः मणान्समग
णाचेमरुतइतिप्रकृते ६३ ६४

श्री हरिः

मन्यसत्तम ६९ दित्यानिष्कपटमुक्तोमति इंद्रोपिनिष्कपटमेवाब्रवीति लब्धमंतरंयेन अर्थयवबुद्धिर्यस्य ७० नमृ
ता।७२ अपिपिरंमोत्तमपि ७३ गुणामपर्गविषयभोगेबुधःकोवृणीत यद्यस्मान्नरकेपिस्यात् ७४ महीयसिमह

सकृदिष्ट्वादिपुरुषंपुरुषोयातिसाम्यतां संवत्सरंकिंचिदूनंदित्यायद्धरिरर्चितः ६५ सजूरिंद्रेणपंचाश
द्देवास्तेमरुतोभवन् व्यपोह्यमातृदोषंतेहरिणासोमपाःकृताः ६६ दितिरुत्थायददृशेकुमारानग्निल
प्रभान् इंद्रेणसहितान्देवीपर्यतुष्यदनिंदिता ६७ अथेंद्रमाहताताहमादित्यानांभयावहं अपत्यमि
च्छंत्यचरंव्रतमेतत्सुदुष्करं ६८ एकःसंकल्पितःपुत्रःसप्तसप्ताभवन्कथं यदितेविदितंपुत्रसत्यंकथय
मामृषा ६९ इंद्रउवाच अंबाहंतेव्यवसितमुपधार्यागतोंतिकम् लब्धांतरोच्छिदंगर्भमर्थबुद्धिर्नधर्मवि
त् ७० कृत्तोमेसप्तधागर्भआसन्सप्तकुमारकाः तेपिचैकैकशोवृक्णाःसप्तधानापिमम्रिरे ७१ ततस्त
त्परमाश्चर्यंवीक्ष्याध्यवसितंमया महापुरुषपूजायाःसिद्धिःकाप्यनुषंगिणी ७२ आराधनंभगवतईह
मानानिराशिषः येवैनेच्छंत्यपिपरंतेस्वार्थकुशलाःस्मृताः आराध्यात्मप्रदंदेवंस्वात्मानंजगदीश्वरं को
वृणीतगुणस्पर्शंबुधःस्यान्नरकेपियत् ७४ तदिदंममदौरात्म्यंबालिशस्यमहीयसि क्षंतुमर्हसिमात
स्त्वंदिष्ट्यागर्भोमृतोत्थितः ७५ शुकउवाच इंद्रस्तयाभ्यनुज्ञातःशुद्धभावेनतुष्टया मरुद्भिःसहतांनत्वा
जगामत्रिदिवंप्रभुः ७६ एवंतेसर्वमाख्यातंयन्मांत्वंपरिपृच्छसि मंगलंमरुतांजन्मकिंभूयःकथयामि
ते ७७ षष्ठस्कंधेअष्टादशोध्यायः १८ राजोवाच व्रतंपुंसवनंब्रह्मन्भवतायदुदीरितं तस्यवेदितुमि
च्छामियेनविष्णुःप्रसीदति १ शुकउवाच शुक्लेमार्गशिरःपक्षेयोषिद्भर्तुरनुज्ञया आरभेतव्रतमिदंसा
र्वकामिकमादितः २ निशम्यमरुतांजन्मब्राह्मणाननुमंत्र्यच स्नात्वाशुक्लदतीशुक्लेवसीतालंकृताम्ब
रे ३ पूजयेत्प्रातराशात्प्राग्भगवंतंश्रियासह अलंतेनिरपेक्षायपूर्णकामनमोस्तुते महाविभूतिपतये

तेमभूतःसमुत्थितः ७५ भार्यैवंवेष्टअष्टादशः १८ ऊनविंशेवयस्मिन्कश्यपेनदितेर्व्रतम् तदेवविहितंलोकेहिता
यहवितोयमम् तस्यप्रकारमितिविषयः १ मार्गशिरोमासेशुक्लपक्षे आदितःप्रतिपदि २ प्रत्तुमेयदृष्ट्वाशुक्लदंतायस्याः
साशुक्लदंतीयोन्नदंताअलंकृतासतीपूजयेत् ३ पाटोतावन्नमस्कारमंत्राहविभिः तेनभ्यमलंपर्याप्तमेवसर्वंनकिंचिदन्यैःकार्यमस्ति अतः

पूजामंत्रमाह नमइति हविःशेषं उपहारावशिष्टं ७ होममंत्रस्यार्थंहेदर्शयति यमिति प्रकर्षेणाभवंतं
ध्यामितिशभवो ८ इत्यायत्नाभिनिर्वर्तकः पुरुषव्यापारोभवनाख्यः क्रियालौकिकी १३ १० महापुरुष.
चेतसाईश्वरबुद्ध्या उपनमेनभजेत पतिस्त्वस्वयंप्रेमशीलः सन् पत्न्याः कर्माणिबिभृयात् नद्रव्यकृतेभ

ॐनमोभगवतेमहापुरुषायमहानुभावायमहाविभूतिभिर्बलिमुपहरामीति अनेनाहरहर्मंत्रेण
विष्णोरावाहनार्घ्यपाद्योपस्पर्शनस्नानवासउपवीतविभूषणगंधपुष्पधूपदीपोपहाराद्युपचारान्
समाहितउपाहरेत् हविःशेषंचजुहुयादनलेद्वादशाहुतीः ७ ॐनमोभगवतेमहापुरुषा(
यमहाविभूतिपतयेस्वाहेति ८ श्रियंविष्णुंचवरदावाशिषांप्रभवावुभौ भक्त्यासंपूजयेन्नित्यं
स गृणामेदंडवद्भूमौभक्तिप्रह्वेनचेतसा दशवारंजपेन्मंत्रंततःस्तोत्रमुदीरयेत् ११ युवांतुवि(
श्वस्यविभूजगतःकारणंपरं इयंहिप्रकृतिःसूक्ष्मामायाशक्तिर्दुरत्यया १२ तस्याअधीश्वरःसा
क्षात्त्वमेवपुरुषःपरः त्वंसर्वयज्ञइज्येयंक्रियेयंफलभुग्भवान् १३ गुणव्यक्तिरियंदेवीव्यंजको
गुणभुग्भवान् त्वंहिसर्वशरीर्यात्माश्रीःशरीरेंद्रियाशया १४ नामरूपेभगवतीप्रत्ययस्त्वमपा
श्रयः यथायुवांत्रिलोकस्यवरदौपरमेष्ठिनौ १५ तथामउत्तमश्लोकसंतुसत्यामहाशिषः इति
भिष्टुयवरंश्रीनिवासंश्रियासह १६ तन्निःसार्योपहरणंदत्त्वाचमनमर्चयेत् १७ ततःस्तुवीत
स्तोत्रेणभक्तिप्रह्वेनचेतसा यज्ञोच्छिष्टमवघ्रायपुनरभ्यर्चयेद्धरिम् १८ प्रियैस्तैस्तैरुपनमेत्प्रे
मशीलःस्वयंपतिः बिभृयात्सर्वकर्माणिपत्न्याउच्चावचानिच १९ कृतमेकतरेणापिदंपत्यो
रुभयोरपि पत्न्यांकुर्यादनर्हायांपतिरेतत्समाहितः २० विष्णोर्व्रतमिदंबिभ्रन्नवि
हन्यात्कथंचन विप्रान्स्त्रियोवीरवतीःस्रग्गंधबलिमंडनैः २१

भवेदित्यर्थः १८ यतोसंपत्न्योर्मध्येएकतरेणाकृतमुभयोरपिभवति १० नविहन्यात् नविच्छिंद्यात्
द्वादशमासानित्यते कदाचित्तन्मध्येमलमासेसति तेनमहद्वादशसंख्यायासत्यान्मुहसैकस्यत्यागःस्या

श्री: भा॰ष॰ टी॰ ५५

पूर्वं हायनमित्युक्तेस्तन्मध्ये तन्मध्यपतितस्यापि प्रसंगः स्यात् तद्भयं वारयितुं भयमुक्तं २३ श्वोभूते प्रभाते स
ति २४ पयसि शृतेन पक्वेन पाकयज्ञविधानेन पार्वणस्थालीपाकविधानेन २४ २५ सुप्रजास्त्वं सत्पुत्रमित्यर्थः
२६ अवीरा विधवा धनेश्वरी सत्यपि या सुदुर्भगा सा सुभगा भवति २७ य आमयावी रोगी स विशिष्टया रुजा

अर्चेदहरहर्भक्त्या देवं नियममास्थितः उद्वास्य देवं स्वे धाम्नि तन्निवेदितमग्रतः अद्यादात्मविशुद्ध्य
र्थं सर्वकामसमृद्धये २२ एतेन पूजाविधिना मासान्द्वादश हायनम् नीत्वाथोपरमेत्साध्वी कार्तिके
चरमेऽहनि २३ श्वोभूतेऽप उपस्पृश्य कृष्णमभ्यर्च्य पूर्ववत् २४ पयःशृतेन जुहुयाच्चरुणा सह सर्पि
षा पाकयज्ञविधानेन द्वादशैवाहुतीः पतिः २५ आशिषः शिरसादाय द्विजैः प्रीतैः समीरिताः
प्रणम्य शिरसा भक्त्या भुंजीत तदनुज्ञया २६ आचार्यमग्रतः कृत्वा वाग्यतः सह बन्धुभिः दद्यात्प
त्न्यै चरोः शेषं सुप्रजास्त्वं सुसौभगम् २७ एतच्चरित्वा विधिवद्व्रतं विभोरभीप्सितार्थं लभते पुमानिह
स्त्री चैतदास्थाय लभेत सौभगं श्रियं प्रजां जीवपतिं यशो गृहान् २८ कन्या च विन्देत समग्रलक्षणं
पतिं त्ववीरा हतकिल्बिषां गतिं मृतप्रजा जीवसुता धनेश्वरी सुदुर्भगा सुभगा रूपमग्र्यम् २९ विन्देद्वि
रूपा विरुजा विमुच्यते य आमयावीन्द्रियकल्यदेहम् एतत्पठन्नभ्युदये च कर्मण्यनन्ततृप्तिः पितृ
देवतानाम् ३० तुष्टाः प्रयच्छन्ति समस्तकामान्होमावसाने हुतभुक् श्रीहरिश्च राजन्महन्मरुतां
जन्म पुण्यं दितेर्व्रतं चाभिहितं महत्ते ३१ इति श्रीभागवते महापुराणे षष्ठस्कंधे पुंसवनव्रतकथनं ना
मैकोनविंशोऽध्यायः १९

विमुच्यते इंद्रियैः सकल्यं देहं च विंदेदिति शेषः पठन्नेव वर्तेत तस्यापि पितॄणां देवतानां चानंततृप्तिर्भ
वतीत्यर्थः ३० उपसंहरति राजन्निति महत्पुण्यं जन्म मरुद्व्रतं च ३१ षष्ठस्कंधनिगूढार्थपदभावार्थदी
पिका सद्भिरामृश्यतामेषा यातिश्रीधरनिर्मिता समाप्तः षष्ठस्कंधः ६ ५५

४५ बहस्त्वंपपत्राणि

६०